THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA
सत्यं शिवं सुन्दरम्

GAEKWAD'S ORIENTAL SERIES

No. 151

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

Gaekwad's Oriental Series
Published under the Authority of the Maharaja Sayajirao University of Baroda

General Editor:
B. J. Sandesara,
M.A., Ph.D.

No. 151

व्यास-मोक्षादित्य-विरचितो

# भीमविक्रमव्यायोगः ।

तथा च

श्रीदुर्गेश्वरपण्डित-विरचितं

# धर्मोद्धरणं नाम नाटकम् ।

P. P. Ac. Gunratnasuri M.S.     Jin Gun Aaradhak Trust

# BHĪMAVIKRAMA-VYĀYOGA

( OF VYĀSA MOKṢĀDITYA )

AND

# DHARMODDHARAṆAM

( OF PAṆḌITA DURGEŚVARA )

Edited by
**Umakant Premanand Shah,**
Deputy Director, Oriental Institute,
M. S. University of Baroda.

**Oriental Institute**
**BARODA**
**1966**

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

First Edition
Copies 500
1966

Published with the financial aid of the University Grants Commission and the Government of the Gujarat State.

Printed by Ramanlal J. Patel, Manager, The Maharaja Sayajirao University of Baroda Press (Sadhana - Press), Near Palace Gate, Palace Road, Baroda and published on behalf of the Maharaja Sayajirao University of Baroda by Dr. Bhogilal J. Sandesara, Director, Oriental Institute, Baroda. March, 1966.

Price Rs. 7=00

*Copies can be had from :—*

***Manager,***
**THE UNIVERSITY PUBLICATIONS SALES UNIT,**
**Near Palace Gate, Palace Road,**
**BARODA**

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## FOREWORD

I am glad to place in the hands of scholars two more Sanskrit plays, probably composed in Gujarat, and published for the first time in this volume. Several such plays composed by authors from this region have been already published in the Gaekwad's Oriental Series, namely, the Pārthaparākrama Vyāyoga, Moharājaparājaya, Hammīramadamardana, Ullāgharāghava, and the Śaṅkhaparābhava Vyāyoga. Dr. Umakant P. Shah has edited both the plays carefully. Being small plays, they are published in one volume, though they are by different authors, of different ages, and represent different dramatic technique.

We are thankful to the University Grants Commission and the Government of the Gujarat State for jointly giving full financial aid towards the publication of this volume.

B. J. SANDESARA
Director

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## CONTENTS


| | Pages |
|---|---|
| Introduction.. | vii-xv |
| Text of Bhīmavikrama Vyāyoga | 1–27 |
| Text of Dharmoddharaṇam .. | 31–76 |
| Errata | 77–78 |


P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# INTRODUCTION

Two Sanskrit plays are being published here for the first time—one, the *Bhīmavikrama-Vyāyoga* by Mokṣāditya and the other, *Dharmoddharaṇam*, an allegorical play by Durgeśvara Paṇḍita. Being small works they are brought out in one volume and have no relation with each other except the possibility of the authors of the plays being natives of Gujarat, which again is not quite certain.

However, it may be noted that very few manuscripts of these plays are known. The British Museum manuscript of Bhīmavikramavyāyoga noted below was written at Bulsar ( Valasāḍa ), south Gujarat, while the only known other manuscript of the play, now in the collection of the Oriental Institute, also probably hailed from some place in Gujarat.

Of the Dharmoddharaṇam again we have come to know of only one manuscript preserved in the Oriental Institute, and it seems to have hailed from Gujarat. Since the author of Dharmoddharaṇam is Moḍha-Brāhmaṇa by caste, he seems to have hailed from Gujarat.

C. D. Dalal who inspected all the Bhāṇḍāras of Patan during the first quarter of this century, and who prepared a Catalogue of Palm-leaf Mss. at Patan ( published as G. O. Series Vol. ) could have seen some more manuscript of Bhīmavikrama-Vyā. at Patan, since he definitely includes the work in a list of Sanskrit dramas of Gujarat given by him in his Introduction to the Pārthaparākrama-Vyāyoga of Paramāra Prahlādanadeva ( G.O. Series, Vol. IV, Baroda, 1917 A.D. ).

## BHĪMAVIKRAMA-VYĀYOGA

C. D. Dalal, in his Introduction to Pārthaparākrama-Vyā. referred to above, referred to our play as Bhīmaparākrama. The correct title of the play as found in the Mukhasamdhi of our play itself is Bhīmavikrama-Vyāyoga.

Playwrights of mediaeval Gujarat seem to have been fond of the Vyāyoga type of drama, which seems to have also found favour with the audience. The Pārthaparākrama Vyāyoga, written by Paramāra Prince Prahlādanadeva of Candrāvatī (near Abu), was acted at the order of the court of Dhārāvarṣadeva, on the occasion of the festival of investing Acaleśvara ( Mt. Abu ), the tutelary God of Paramāras of Abu, with the sacred thread. Rāmacandra, the famous learned pupil of Hemacandrācārya, also composed a Vyāyoga called Nirbhayabhīma-Vyāyoga.

Of the Vyāyoga type, the following dramas have been known hitherto :—

1 Nirbhayabhīma-Vyā. of Rāmacandra.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

2 Bhīmavikrama-Vyā. of Mokṣāditya.
3 Bhīmaparākrama-Vya. of Śatānandasūnu.
4 Dhanañjayavijaya of Kāñcanācārya.
5 Kirātārjunīyavyāyoga of Vatsarāja.
6 Jāmadagñyavijaya.
7 Narakāsuravijaya of Dharmapaṇḍita.
8 Pracaṇḍabhairava of Sadāśiva.
9 Pracaṇḍagaruḍa or Vinatānanda of Govinda, son of Śeṣayajñeśvara.
10 Vikrāntarāghavīya by Śrīkṛṣṇa.
11 Vīrarāghavīya by Pradhāna Veṅkaṭabhūpati.
12 Saugandhikāharaṇa of Viśvanātha.
13 Nṛsimhavijaya.
14 Vijayavikrama by Āryasūrya of Kauṇḍinyagotra.[1]
15 Narakāsuravadha-Vyāyoga by Dharma, son of Parvateśvara.

C. D. Dalal referred to the play of Mokṣāditya as Bhīmaparākrama-Vyāyoga, but as will be seen from the text printed here, the real title of the play is Bhīmavikrama-Vyāyoga.

Bhīmaparākrama-Vyā. was composed by Śatānandasūnu, and is published in the Trivandrum Sanskrit Series, no. 173. It is however interesting to note that the theme of these two plays referring to the valour of Bhīma is the same, namely, the Jarāsandhavadha by Bhīma. But the treatment of the plot is different in both the cases.

Mokṣāditya has generally followed the story as obtained in the Mahābhārata, Sabhāparvan, adhyāyas 15–24 (Gorakhpur ed. and adhyāyas 13–22 Cr. Ed. Poona with appendices). He has made only a few changes required to suit the technique of the Vyāyoga, by condensing the plot of ten adhyāyas covering a long period. He has been successful in showing that the whole action took place in one day (twenty-four hours), thereby fully recognising the chief characteristics of a Vyāyoga[2] which require that the action should cover

[1] Nos. 1, 2, 4, 5, 6, 7, 8, 9, 12, have been noted by C. D. Dalal in his Intro. to Pārthaparākrama-Vyā., p. iii. He took Vinatānanda of Govinda and the Pracaṇḍagaruḍa as two separate works. M. Krishnamachariyar, in his Classical Sanskrit Literature, p. 699, regards the two as one and the same play; Nos. 10, 11, 13 & 14 are added from his list. Ms. of No. 15 is in the collections of the B.O.R.I., Poona.

The list of Vyāyogas given above is not exhaustive.

[2] Cf :—

एकाह्चरितैकाङ्को, गर्भामर्शविवर्जितः।
अस्त्रीनिमित्तसङ्ग्रामो, नियुद्धस्पर्धनोद्धतः॥ ९॥
स्वल्पयोषिज्जनः ख्यात-वस्तुर्दीप्तरसाश्रयः।
अदिव्यभूपतिस्वामी, व्यायोगो नायिकां विना॥

— नाट्यदर्पण, 2. 9-10, (G. O. S. No. XLVIII, 2nd ed.), pp. 108-109.

(Contd. on the next page)

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

To return to the plot, Jarāsandha, mistaking the three as Brāhmaṇas welcomes them and offers *arghya* which is turned down, whereupon Jarāsandha suspects that they are not real Brāhmaṇas and asks them to speak the truth. He further suspects that they are Kṣatriyas. Bhīma discloses the identity of all the three and after a rather haughty discussion, Jarāsandha offers to enter into a duel with either one or two or all the three of them on the other side. Finally, a duel fight between Bhīma and Jarāsandha is agreed upon. The fight takes place behind the curtain ( *nepathye* ) and is described to the audience through the mouths of Krishna and Arjuna. Krishna's suggestion to Bhīma by saying: पाण्डुनन्दन ! किमप्युन्मत्त इव चेष्टसे । नाऽयमतिकदर्थितोऽपि मर्मभेदमृते जीवितं मुञ्चति । is noteworthy. Corresponding to this we have something else put into the mouth of Krishna, in MBH. Sabhā. ( Cr. ed. ), 21. 19-21,[3] and in 22. 3-4.[4] It will be seen that the speech of Krishna in Mahābhārata ( cr. ed. ) is much better whereas in the change affected by Mokṣāditya Krishna points out more clearly to Bhīma the way to destroy Jarāsandha.

After killing his enemy, Bhīma frees the kings imprisoned by Jarāsandha and accepts from Sahadeva, the son of Jarāsandha, his younger sister offered to the victor. Then Krishna, Arjuna and Bhīma leave for going to Indraprastha. The play ends with Bharata-vākya.

*Author of Bhīmavikrama-Vyāyoga*:—Nothing is known about Vyāsa Mokṣāditya except what he says in the Prastāvanā. According to him, he is the son of one Bhīma and the pupil of the poet Harihara who is the foremost amongst poets.

---

[3] *Cf.* :—तं राजानं तथा क्लान्तं दृष्ट्वा राजन्जनार्दनः ।
उवाच भीमकर्माणं भीमं संबोधयन्निव ॥ १९ ॥
क्लान्तः शत्रुर्न कौन्तेय लभ्यः पीडयितुं रणे ।
पीड्यमानो हि कार्त्स्न्येन जह्याज्जीवितमात्मनः ॥ २० ॥
तस्मात्ते नैव कौन्तेय पीडनीयो नराधिपः ।
सममेतेन युध्यस्व बाहुभ्यां भरतर्षभ ॥ २१ ॥
MBH. Sabhā. (Cr. Ed.), 21, 19-21, p. 118.

[4] Compare:—
एवमुक्तस्ततः कृष्णः प्रत्युवाच वृकोदरम् ।
त्वरयन्पुरुषव्याघ्रो जरासन्धवधेप्सया ॥ ३ ॥
यत्ते दैवं परं सत्त्वं यच्च ते मातरिश्वनः ।
बलं भीम जरासंधे दर्शयाशु तदद्य नः ॥ ४ ॥
MBH. Sabhā., Cr. ed. 22. 3-4, pp. 119-120.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

The play was composed in Saṁvat 1385=1328 A.D. Nothing is known about his father Bhīma. In the Sūktimuktāvali of Vallabhadeva, composed in c. fifteenth century A.D., we have a few subhāṣita-verses composed by one Bhīma[5], but it is difficult to identify this poet Bhīma with the father of Mokṣāditya for want of any convincing proof.

The poet Harihara of Gujarat, was a contemporary of Someśvara, the author of Ullāgharāghava, Kīrttikaumudī, etc. (c. 1179-1262 A.D.) and of the minister Vastupāla of Gujarat. This Harihara is supposed to be the son of one Mokṣāditya mentioned in a praśasti of Mahākāleśvara (old Porbundar State, Saurashtra), dated in V. S. 1320[6]. But this poet Harihara had hailed from Gauḍa. As shown by B. J. Sandesara, this poet Harihara was a descendant of Śrīharṣa, the author of Naiṣadhīyacarita.[7]

The surname Vyāsa is common in Gujarat, so also do we find the name Mokṣāditya in the inscription noted above. Further both the manuscripts of this work of Mokṣāditya, known hitherto, are obtained from Gujarat—one is in the Oriental Institute, and the other, now in the British Museum, was copied in V.S. 1473 (=1416 A.D.) at Bulsar (Valasāḍa) in South Gujarat. It is, therefore, quite probable that the author of Bhīmavikrama-Vyāyoga hailed from Gujarat. If Harihara, the contemporary of Vastupāla, was alive upto c. 1275 A. D., and if Mokṣāditya, himself young, had become a pupil of Harihara in the latter's old age, then it would be possible that Vyāsa Mokṣāditya was pupil of Harihara, the author of Śaṅkhaparābhava-Vyāyoga.

In this connection it may be remembered that Mokṣāditya refers to Harihara as *Kavinivaha-Dhurandhara*. Someśvara, a contemporary of Harihara, referred to him as *Kavīnāṁ Pākaśāsanaḥ* in Kirttikaumudi 1.25.

*Manuscripts utilized for this edition* :

**O = Manuscript No. 6877 Oriental Institute,**
**M. S. University of Baroda.**

Date of Copying:—Saṁvat 1508 (= 1451-52 A.D.).

Extent:—12 folios, Granthas 400.

Script:—Devanāgarī, on paper.

Size:—9.5 in. × 4 in. with margin on all sides.

Remarks:—The manuscript begins on 1b and ends on 12b. There are nine lines on each side of the folio and 40 to 45 letters in each line. Writing is

5 Subhāṣitāvali of Vallabhadeva (Poona, 1961), pp. 269, 292, 303.

6 M. Krishnamachariyar, *op. cit.*, p. 205, ft. note 1.

7 Sandesara, B. J., *Literary Circle of Mahāmātya Vastupāla*, pp. 52 ff.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

clear and letters like ग्ग, श्च, स्थ etc. are peculiar. There are some marginal notes here and there. There are however many lacunae and a number of scribal errors. The portion beginning with निषेध (text p. 15, line 8) and ending with द्वारि केनचित् ( printed text p. 16, line 15 ) appears on folio 8b line 1 to folio 9a line 4. But this should have been on folio 7b line 8 as is proved from the manuscript preserved in the British Museum, London. The marginal notes seem to be of different handwriting.

**B = Manuscript preserved in the British Museum, London**

Photostat copy preserved as no. 14625 in the Oriental Institute, Baroda.

Age:—Manuscript copied in V. S. 1483, Śaka 1347 = 1426-27 A. D. at Valasāḍi ( = Valasāḍa or Bulsar, south of Surat in Gujarat).

Extent:—Folios 14, Granthas 400.

Size:—Excluding margins—7″ × 3″.

Script:—Devanāgarī, on paper.

Remarks:—Ten lines per page with 30 to 33 letters in a line. Handwriting generally clear. First two folios missing in this manuscript.

The scribe's entry at the end of the text, noted in foot-note, on p. 27 of our printed text, is noteworthy. It shows that the manuscript was copied in Valasāḍi in Saṁvat 1473 (Śaka 1347) when Mahārājādhirāja Śrī Jāīdeva was ruling, for the study of Maham. Kānhaiyā who was the son of Mahaṃ. Bulā of the Kāyastha caste, in the Pañcakula-pratipatti of Amātyarāja (minister-in-chief) Śrī Jesā of Bāraḍa caste.

Nothing more is known about the personalities mentioned above and the colophon is important in as much as it gives us, for the first time, information about a local ruler Śrī Jāīdeva, ruling at Valasāḍa in 1426-27 A.D.

## DHARMODDHARAṆAM

The second play, published in this volume is an allegorical play, by one poet Durgeśvara Paṇḍita, the son of Bhaṭṭa Dharmeśvara, a Moḍha-Brāhmaṇa by caste.

It is well known that the Moḍha Brāhmaṇas originated from Moḍherā in the North Gujarat. It is, therefore, quite certain that the author hailed from Gujarat. In the beginning, in the first act, while giving this information about himself, the author calls this play a Nāṭaka. We have, therefore, retained the title धर्मोद्धरणं नाम नाटकम् as given by the author. The play, however, is made up of four acts with no Sandhis and Prastāvanā. The Upasaṁhāra at the end is

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

styled Prastāvanā in the manuscript, and we have retained this heading on p. 73, as found in our manuscript, which however is wrong and this concluding portion should rather have been called Upasaṁhāra.

Like the Prabodha-Candrodaya, the Moharāja-Parājaya, etc., this is an Allegorical play where different guṇas (*merits*) and doṣas (*demerits*), like Dānam, Krodha, Moha, etc., the different sentiments (*rasas*) like Vīra, Raudra, Karuṇa, etc., as also Dharma, Dvāpara-yuga etc. are personified. There are several characters in the play. Dvāpara age, personified as Sārvabhauma king seems to be the Hero (Nāyaka), with Dānam (Gift) as his minister and Dharma as his Yuvarāja. The Kali-Yuga, also personified as a king is the Prati-Nāyaka with his own retinue of Anācāra (Bad-conduct), Adharma, Dambha, Krodha, etc. There is no Nāyikā.

Briefly speaking, the plot is as follows:—After Nāndī, Sūtradhāra enters and discusses with his followers, the Śailūṣās, what drama they should enact on the stage for recreation of the audience. They select Dharmoddharaṇam composed by Durgeśvara.

Then Kali personified as an antagonist king, a Prati-Nāyaka, appears on the stage with his Prince Anācāra whom he asks to find out where Dharma is. The same question is repeated to Nāstika, Dambha, Krodha etc. (all personified) since no one could report where Dharma was. The night is spent in these queries and, with the exit of them all, ends the first act.

In the second act, Kali invites his two chief favourite servants Duḥśīla and Durnaya, and asks them to bring news about the spreading or decline of Dharma. They visit several regions (of India) including Kuru-Kamboja-Kośala-Ketaya-Kāśmīra-Kaliṅga-Kirāta-Kāmarūpa-Mālava-Magadha-Maru-Śaka-Cola–Gauḍa-Vaṅga–Aṅga–Vidarbha–Pāṇḍya–Pāñcāla–Haihaya–Kerala–Mahārāṣṭra--Tilaṅga-Karṇāṭa-Draviḍa-Kuṅkaṇa-Gurjara-Saurāṣṭra-Kaccha-and-Vaṅgāla etc., find out that Dharma was thrown out by Nirodha, the son of Kāma, that Vedas, Śāstras, Purāṇas etc. were uprooted by Tiraskāraḥ (hatred), the son of Krodha, that the Brahmaṇas were losing their Buddhi being distressed by poverty, that the performances of sacrifices etc. was given up on account of Kārpaṇya, that the Devasadanas (temples of Gods) were brought down by the Mlecchas by the order of Ajñāna, the son of Moha, and so on.

This reference is noteworthy since it shows that this work refers to the condition of India during and after the onslaught of the fanatic Moslem iconoclasts, and therefore during and after c. 14th or 15th century, and probably referring to the conditions of circa 17th century A.D.

Duhśīla and Durnaya further the Gods in the temples, approached Lord Śeṣaśāyin (Viṣṇu) whom they appealed for protection. News is brought at this

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

juncture that (condition of the age of) Dvāpara has come into existence. Hearing this, Kali along with his two associates runs away to the Western ocean. The second act ends here.

Dvāpara enters in the third act, along with Śubhācara. It is reported that sacrifices have been started, that the Brāhmaṇas are now engaged again in the study of Vedas with their Aṅgas. Dāna is called and praised. He reports that peace is being gifted through the hands of King Bhāgyocca. Who this king Bhāgyocca is, is not known. He is again referred to at the end of the play in the Bharata-vākya. It is just possible that the name is purely mythical. However, this requires further research.

King Dvāpara appoints Dānam as his minister, and asks him to exert in order to protect and reestablish Dharma ( धर्मोद्धरणोद्योगः कर्तव्यः ). Dharma was to be annointed as Yuvarāja. The minister carries out these orders.

Dāna, in company of Dharma, visits the homes of the learned and asks the Buddhi of the learned to protect the whole literature, the Vedas, the Śāstras, the Purāṇas etc. Ālasya is destroyed, Anabhyāsa runs away. The Yajñas are assured safety. Then Dāna and Dharma go to Vārāṇasī and bathe in the Ganges. Lord Viśveśvara who had hidden himself in the waters of the Ganges is requested to come out. Dharma and Dāna then proceed further. Śama, Dama etc. are asked to put into captivity Smara and others. Adharma then runs away, and is destroyed. Dharma and others then go to Avantī, on the banks of the river Kṣiprā. The Mahākāleśvara-pīṭha is reestablished, and worshipped Similarly, reerecting temples on the way, they reach Tryambaka, and the banks of Godā (Godāvarī) river. Then they go to Ghuśmeśvara (Jyotirlinga of Ghṛṣṇeśvara near Ellora caves) and there the worship etc. are reestablished. Later they go to Setubandha Rāmeśvara. Thus after digvijaya in all quarters they return to the king. The third act ends here.

Śṛṅgāra requests Yuvarāja that he should be freed. The author introduces in this act, the various Rasas—Hāsya, Karuṇa and others—personified. The descriptions of each of them are noteworthy. The author also introduces here and describes the various Nāyikās like Virahotkaṇṭhitā, Vipralabdhā, Kalahāntaritā, Khaṇḍitā Māninī, Abhisārikā, Jyotsnābhisārikā, Kṛṣṇābhisārikā and others. The whole fourth act is thus interesting and shows the author's proficiency in poetics etc.

Last we have a Prastāvanā which really should be Upasamhāra. Here an assembly of the learned (Paṇḍitamaṇḍalī) is iutroduced before Dharma. It is noteworthy since the various branches of learning which were popular amongst Brāhmaṇas in the age of our author are incidentally known. They are Mīmāṁsā, Nyāya, Vedānta, Vyākaraṇa, Yājñika-karma, Kāvya, Bhaiṣajya and Jyotiṣa. The Brāhmaṇas are honoured and the play ends with Bharatavākya

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

which refers to a king called Bhāgyocca who is also referred to in the beginning of the third act, text p. 48, v. 5.

It seems that the play was composed after the destruction of the temple of Viśvanātha on the orders of Aurangzeb ( in 1696 A.D. ), after which for about a century the temple could not be reconstructed. It is also not unlikely that the play was composed sometime after 1785 A.D. when Ahalyābāī rebuilt the temple of Viśvanātha. This is probable because Ahalyābāī also repaired and rebuilt the temples of Mahākāleśvara at Ujjain and the shrine of Ghṛṣṇeśvara near Ellora.

Nothing more is known about the author or his date.

*Manuscript used for this edition*: Manuscript no. 39, on paper, in the collections of the Oriental Institute, Baroda.

Age:—Not mentioned.

Condition:—Good.

Extent:—Folios 20, Granthas 600.

Script:—Devanāgarī on paper.

Size:—9.3 in. × 4 in., 15 lines per page, each line has about 35 to 38 letters.

Ms. begins on folio 1b and ends on 20a. Letters झ, द, ल are written similar to those found in Gujarati manuscripts. श्च is generally written as श्र. च् is dropped in conjuncts and is written as गछंतु, पृछ् etc. Anusvāra is generally used for nasal consonants and the sign of Avagraha is always omitted.

x x x.

I am very thankful to the authorities of the British Museum, London, for supplying me with a micro-film and a photocopy of the ms. of the Bhīmavikrama-Vyāyoga in the collections of the British Museum. The British Council kindly helped us in obtaining the copies.

I am very thankful to Prof. B. J. Sandesara, Director, Oriental Institute, Baroda, and to Shri J. S. Pade-Shastri for certain valuable suggestions. I am also very thankful to Pandit B. L. Shanbhogue who copied the manuscripts for me and helped me in the preparation of press-copy. Shri J. S. Pade-Shastri also kindly corrected some proofs for me.

I am thankful to Shri R. J. Patel, Manager, M. S. University of Baroda Press, Baroda for all the services he has given in seeing this volume through the Press.

UMAKANT P. SHAH

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

॥ श्रीः ॥

व्यास-श्रीमोक्षादित्य-विरचितो

# भीमविक्रमव्यायोगः ॥

॥ [1]ॐ नमो(मः)। गणेशाय नमः ॥

[2]देवस्याऽनुचरो विरञ्चिजरुषा[3] भूमावभूद्दानवः
षट्पुत्रैः सह पूर्वदे(दै)वतवृतो यो विष्णुना वैरकृत्।
तं यं (यो) विश्वरिपुं हिरण्यकशिपुं हन्ति स्म दोर्लीलया
भूयाद्वो नरकेसरी भवभयध्वंसी स [4]भीमाकृतिः ॥ १ ॥

(नान्द्यन्ते)

**सूत्रधारः**—भो भोः ! अखिलभुवनमण्डलमहनीयमुनिगणगुणाङ्गीकरणप्रगुणितपरममुदः सभासदः श्रूयताम् । तत्रभवताममलमनोवृत्तिर्मरालकुलवधूः कतमप्रबन्धप्रवरसरसि रसमधुरमृणालीं रिरंसयिपति ? यूयं किं ब्रूथ ? **कविनिर(व)हधुरन्धरस्य हरिहरस्यान्तेवासिना भीमतनयेन मोक्षादित्येन विरचितो भीमविक्रमनामा व्यायोगो**ऽभिनीयतामिति। युक्तमिदम्। (नेपथ्याभिमुखम्) कः कोऽत्र भोः ?

(प्रविश्य)

**पार्श्वकः**—भाव [ः] किमाज्ञापयति ।

**सूत्रधारः**—मारिष! भुवनभारकरदनुजावतारनृपवरत्रिपुरपरिभवनभीमस्य भीमस्य प्रकटितभुजविक्रमयोगं व्यायोगमभिनेतुं परिषदाज्ञा ।

**पार्श्वकः**—(सविषादम्) भाव! सम्प्रति कपटपटुना केनापि गिरिव्रजनिवासिना निशाचरेण सकलमपि कुशीलवकुटुम्बकदम्बकं निरपराधं निरुद्धमास्ते। अतः कथमिह तावे(व)[दे]काकिनो नृत्यम् ?

---

१. B. The beginning portion up to स्य in verse 9 missing.
२. O. Marginal note विष्णोः।
३. O. Marginal note सनकक्रोधेन।
४. O. 'सर्वप्रहरणायुधोऽचिन्त्यशक्तिः श्रीमूर्तिः'। marginal note above, and in lower margin—'ब्रह्मचर्मशिरःपट्टी दिक्पालोर्ध्वाङ्गभूषणः । द्वादशार्कशिरोदामा रुद्रशीर्षैकनूपुर' इति इन्दुचूडोक्तेः ॥



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**सूत्रधारः**—मारिष ! मा विषीद । अयमहं—

निशाचरं विनिर्जित्य मोचयाम्यचिरेण तान् ।
यथा हं( ह )त्वा जरासन्धं भीमसेनोऽवनीभुजः ॥ २ ॥

( इति निष्क्रान्तौ )

## प्रस्तावना

( ततः प्रविशति भीमसेनः कृष्णार्जुनौ च )

**भीमः**—( साऽभ्यसूयम् ) सखे ! कृष्ण ! पश्य विधिवैचित्र्यम्—

वला( ल्या )द्विक्रमकर्कशांसविलसद्दोःस्तम्भसंस्तम्भिताऽ-
घोगगच्छ( घोगच्छ )द्धरणीतलेषु तनयेष्वस्मासु तिष्ठत्स्वपि ।
पाण्डुः प्रेतपतेः पुरं प्रवसति स्थित्वाऽन्त्यजस्यालये
विक्रीतात्मगृहात्मजोऽपि स हरिश्चन्द्रो विरञ्चेः पुरम् ॥ ३ ॥

अपि च—

भ्रातॄणां विषवह्निदायिनि सुते [1]दुष्टेऽपि दुर्योधने
भुङ्क्ते पश्य पितामहस्थितिमसौ वृद्धाम्बिकेयो विदृक्[2] ।
विप्रेभ्यो विविधान्नवाञ्छितवृहद्दानावलीदायिनि
स्थानं याति युधिष्ठिरे सति सुते पाण्डुर्न पैतामहम् ॥ ४ ॥

**कृष्णः**—( सानुनयम् ) सखे ! [ मा ]मैवम् । इदमपि सत्कर्मण एव फलम् ।
पश्याऽत्र—

हरिश्चन्द्रं च चन्द्रं च राजसूयविधायिनौ ।
विहायारोहति विधेर्लोकं शम्भुशिरश्च कः ॥ ५ ॥

**अर्जुनः**—कृष्ण ! नारदोक्तपितृवचनप्रबोधितो महाराजस्तदर्थमार्यभीमसेनेन जरासन्धं घातयति, तद्विधृतमहीपतीन्मोचयति ।

**कृष्णः**—अथ किम् !

---

१. O. Marginal Note. महामानिनि ।
२. O. Marginal Note. प्रज्ञाचक्षुः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**अर्जुनः**—प्रारब्धं संविधानमिदमस्माभिः । सिद्धं[१] च भीमसेनाऽभियोगेन ।

**कृष्णः**—प्राप्ता वयमिन्द्रप्रस्थाच्चैत्यकादिगिरिपञ्चकवृतं गिरिव्रजम् । तदस्याम-शोकच्छायायामुपविश्य क्षणं मार्गश्रममपनयामः शर्वरीशेषं च निर्गमयामः ।

( इति सर्वे यथोचितमुपविशन्ति । )

**भीमः**—( सहर्षाऽभिमानम् ) कृष्ण ! कोऽयमिहाऽभियोगो नाम । यतः

हस्तैकोदस्तहस्तिव्रजहतिपतितानेकनागाश्वपत्तिः( त्ति- )
स्फीतासृक्सिन्धुवेणिप्रतरपटुभटोड्डमे( टाडम्ब )रे सङ्गरेऽद्य ।
दोर्दण्डोद्यद्गदाग्राहतिकवचवृतस्कन्धभग्नास्थिबन्धं
हन्ताऽहं राजमेधोद्यमकुमतिकरं तं जरासन्धमन्धम् ॥ ६ ॥

**कृष्णः**—सखे ! भीम ! इदं किल मगधपतिबलं चिरकवलकृता कालेनाऽपि नाऽन्तं नीयते । अतः खलु चक्रधरधवलाभिधानशिष्याभ्यामावाभ्यामनुगतेन राजशेष( ख )-राचार्येण भवता द्वन्द्वयुद्धेनैव मगधपतिरयं निहन्तव्यः । अत एव नः स्नातकाङ्गशृङ्गारः ।

**अर्जुनः**—कृष्ण ! कोऽयं जरासन्धः, कथमुत्पन्नश्च ।

**कृष्णः**—सव्यसाचिन् !

बृहद्रथ( थो ) नाम बलैर्विशालः पुराऽभवन्मागधभूमिपालः ।
गुणैरगाधो विगतान्यबाधः स चाऽनपत्यो मुनिमारराध ॥ ७ ॥

अपि च—

चण्डकौशिकमुनिः किल यस्मै यद्रसालफलमर्पयति स्म ।
तस्य तच्छकलितं मतिमोहात्प्राशितं प्रियकलत्रयुगेन ॥ ८ ॥

ततश्च—

सम्प्राप्य गर्भमथ तद्दयिताद्वयेन तच्चित्रपुत्रशकलद्वितयं प्रसूतम् ।
एकांह्रिहस्तनयनश्रवणं सजीवमर्धोदरास्य[२]गलमर्धशिरो दधानम् ॥ ९ ॥

ततश्च—

---

१. O. Marginal Note. निलनिश्चयं ।
२. The British Museum Ms. begins here. Preceding folios are lost in the Br. Mu. Ms.

P. P. Ac. Gunratnasuri M.S.     Jin Gun Aaradhak Trust

तद्वीक्ष्य धिग्धिगिति धातृकरेण ताभ्यां प्राकारदूरपरिखाकुहरे निरस्तम् ।
काचिन्निशीथ[1]समयेऽथ जराभिधाना रक्षोवधूश्च समधत्त विधेर्नियोगात् ॥१०॥

अपि च—

क्षुध्याकुलाऽपि कवलीकृतलालसाऽल-
मुत्पाटनाय न हि तस्य निशाचरी सा[2] ।
सोऽपि प्रकम्पितधरातलमाकुलाभिः
स्त्रीगर्भपातनकरं भृशमुन्ननाद ॥ ११ ॥

अपि च—

सा तद्भवश्रवणशङ्कितमागताय
भूपाय पुत्रकमदात्तमुदन्तमुक्त्वा ।
तेन प्रदाय बहुदायमपारसारा
सा दुर्गरक्षणविधौ सगणाऽपिचक्रे ॥ १२ ॥

ततश्च—

दुर्गं पुरस्य परितः कुरुतेऽश्मवृष्टिं
दृष्टिं निहन्त्युपगतस्य रिपो रणाग्रे ।
द्वारेण चेत्प्रविशतीह रिपुर्विनाऽपि
कोणाहतिं कनकदुन्दुभयो[3] ध्वनन्ति ॥ १३ ॥

जरया सन्धितोऽयमिति जरासन्धः । हरवरेणाऽयमशस्त्रनिधनश्च ।

**अर्जुनः**—ततस्ततश्च ।

**कृष्णः**—पितुरनन्तरमयमवनिपतिर्जातः । ततश्च—

मयाऽस्य जामातरि कंसनाम्नि हते मदान्धो मथुरां रुरोध ।
निर्जित्य निर्जित्य[4] मया निरस्तः पुनः पुनस्तं कुरुतेऽभियोगम् ॥ १४ ॥

किञ्च—

१. O. Marg. Note मध्यनिशायां ।
२. O. Marg. Note. दैवनियुक्ता सा ।
३. O. दंदुभयो । B. दुंदभयो ।
४. O. omits. one निर्जित्य ।

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

अक्षौहिणीनां युधि विंशतिः सत्रयी हता सप्तदशेह वारान् ।
अष्टादशे त्वस्य बलाभियोगे मया स्थितौ द्वारवती कृताऽसौ ॥ १५ ॥

अपि च—

स हंसनामा डिभकश्च सोऽन्यः[1] शस्त्रैरवध्यौ सचिवावभूताम् ।
मृषोक्तमन्योन्यवधं निशम्य ममाऽनुगैर्गाङ्गजले निमग्नौ ॥ १६ ॥

अपि च[2]—

अहं जरासन्धवधं विधित्सुर्निवारितो व्योमगिरेश्वरस्य ।
नाऽयं त्वया कृष्ण ! निषूदनीयो भीमस्य भागो[3]ऽयमिति स्फुटोक्त्या ॥ १७ ॥

**अर्जुनः**—कृष्ण ! महाबलोऽयं मागधो यस्य दिग्विजये राधेयेन गदायुद्धे साम्यम् ।

**भीमः**—( सभ्रूभङ्गम् ) फाल्गुन ! मम केयं मगधपतिफल्गुस्तुतिविभीषिका ।

किञ्च—

हन्मि चेन्मागधं नाऽद्य मोचये न महीभुजः ।
नेन्दुवंशभुवां तेषां पूर्वेषां गतिमाप्नुयाम् ॥ १८ ॥

**अर्जुनः**—( सानुनयम् ) आर्य ! सामान्यस्तुतिरियम् । अप्रतिहतमार्यस्य भुजबलम् ।

**कृष्णः**—( सश्लाघम् )

द्रौपद्यानयने येन कर्णशल्यादयो[4] जिताः ।
तत्तुल्यं मागधं हन्तुं शक्तः किं न वृकोदरः ॥ १९ ॥

## ॥ इति मुखसन्धिः ॥

---

१. O. सौम्यः । २. O. omits. अपि च ।
३. O. भागेयमिति । ४. O. शिल्यादयो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## ॥ अथ प्रतिमुखम् ॥

**कृष्णः**—धनञ्जय ! यावदादित्य उदेति तावद्गौतमाश्रमसन्निहितं सिद्धेश्वरमारा-
: ।

**भीमः**—व्रजतं युवाम् ।

( कृष्णार्जुनावुत्थाय परिक्रामतः । )

**अर्जुनः**—कृष्ण !

येनाक्रान्ता बलौघैर्मुहुरिह मथुरामत्यजन्माधवास्ते
त्वन्नाथान्यश्च पार्थानपि बहुलबलः सन्दधे सौहृदेन ।
यश्च क्षोणीश्वराणां शतमदयमतिः शैवयागे[1] जुहूष-
[2]त्यारात्कारागृहस्थं स मगधनृपतिर्मानवैर्नैव जय्यः[3] ॥ २० ॥

किञ्चार्यमारुतिरतिबलवानथवा किं बलवानस्मत्सहायापेक्षी ।

**कृष्णः**—मैवम्[4] । द्वन्द्वयुद्धे कः कस्य सहायः ।

( इति निष्क्रान्तौ )

( नेपथ्ये )

भगवन्मृत्युञ्जय ! मन्दभाग्येन निरन्वयनामासि ।

**भीमः**—( श्रुत्वा ) कोऽयं मृत्युञ्जयमुपालभते । भवतु, जानामि । ( इत्युत्थाय याऽवलोक्य च ) अहो राजकुमार इवायम् । विटपान्तरितः परीक्षयाम्येनम् । कृत्वा निरूप्य च )

कश्चित्कृच्छ्रातिकृच्छ्रव्रतकरणकृशः शुक्लचैलं दधानः
स्नानातिक्लिन्नकेशः करयुगविलसद्दर्भकोऽनर्भकोऽयम् ।
श्रौतैर्मन्त्रैश्च जुह्वन् ज्वलति हुतवहे हव्यमव्याहतेच्छः[5]
[6]स्वस्थोऽयं क्षत्रपुत्रो यजति गतसुखस्त्र्यम्बकं साम्बुनेत्रः ॥ २१ ॥

( ततः प्रविशति यथानिर्दिष्टः पुरुषः )

**पुरुषः**[7]—भगवन् !

P. P. Ac. Gunratnasuri M.S.     Jin Gun Aaradhak Trust

चिरमकारि मया मुनिवत्तपः श्रुतिजपश्च समाधिममुञ्चता ।
हुतमनन्तहविस्तव तुष्टये न हि महेश मनागपि तत्फलम् ॥ २२ ॥

सम्प्रत्यहमसुखशरीरयोः सममन्तमुपनयामि ।

**भीमः**—( स्वगतम् ) अहह ! अहो महदसुखमस्य येन शरीरत्ययमपि चिकीर्षति । ( विचिन्त्य )—

जीमूतवाहनदधीचिमुखा[1] महान्तः प्राणांस्तृणानिव ददुः परपालनाय ।
यद्येनमद्य मनुजं न हि जीवयामि किं जीवितेन मम शम्बरसम्मतस्य[2] ॥ २३ ॥

किञ्च—

एतद्गताविहरणे मरणेऽपि जाते
सम्पश्यतोऽद्य मम जन्मफलं महीयः ।
क्षोणीशमोक्षणविधावलमेकवीरौ[3]
कृष्णार्जुनौ ननु जरातनयं निहत्य ॥ २४ ॥

**पुरुषः**—भगवन् !

सजपाद्युपहारशङ्कर तव[4] तुष्टयै ननु को नु जायते ।
उपहारमिमं महत्तमं मम शेषं वपुराहराम्यहम् ॥ २५ ॥

( इत्युत्थाय नाट्येन वह्निं प्रदक्षिणीकुरुते । )

**भीमः**—( सविमर्शम् ) किं वारयामि । अथवा वृत्तपर्यन्तमन्वेषयामि ।

**पुरुषः**—( पराङ्मुखः प्राञ्जलिश्च ) नाथ !

वङ्गराजकुले जन्म भूयान्मे त्वत्प्रसादतः ।
न पितृभ्रातृपुत्राद्यैर्वियोगोऽस्तु कदाचन ॥ २६ ॥

( इति पिपतिषुः परिकरं बध्नाति । )

( नेपथ्ये )

हा ! जयवम्मणन्दण[5] ! हा सुलक्षण ! हा महावीर !
हा वीरवम्म ! कहं [6]अत्ताणयं अणले क्षेवसि ? पडिवालेसु मं ।

---

१. O. -दधीच-। २. B. -सम्मितस्य। ३. B. ०मेव वीरौ।
४. O. ०पहारा- संकरस्तव। ५. O. ज*वामरणंदण। ६. O. अत्तारयं।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**वीरः**—( श्रुत्वाऽवलोक्य[1] च ) इयमस्मन्माता जयश्रीर्मज्जायया सह समागच्छति। भवतु, प्रतिपालयामि।

( प्रविश्य सवधूका। )

**जयश्रीः**—( उपसृत्य पुत्रं करे धृत्वा ) ताद !

जह्म दिणे तुह तादो तुह भायरेण समं मागहेण।
धरिदो तदा पहुदि मये अज्ज तुह पउत्ती लध्दा ( लद्धा ) ॥ २७ ॥

ता[2] इत्ययं ( इच्चयं ) कालं कहं ठिदो तुह्मं।

**वीरः**[3]—[ अम्ब ! ] मयेह बहु तपस्तप्तं तन्मोक्षणाय।

**जयश्रीः**— ता कहिं अत्ताणयं बाधा[ द ]असि[4] ?

**वीरः**—निष्फलतपस्त्वात्। किञ्च। प्रातः किल निखिलनियतनरपतीनां हरतोषाय होमो भविता।

**जयश्रीः**—( सास्रम्[5] ) हा वङ्गरायकुलणंदन[6] ! हा सत्तं( त्त )गुणरयणभंडार ! हा महाराय जयवम्म ! हा अज्जउत्त ! कहिंसि देसु[7] मे किंकरीए पडिवयणं। ( इति मूर्च्छां नाटयति )

**वधूः**—( सास्रम् ) समस्स[ सि ]दु समस्स[ सि ] दु।

( अम्बां पटाञ्चलेन वीजयति। )

**भीमः**—( सकरुणम् ) विज्ञातममीषां मरणकारणम्।

**वीरः**—मातः ! व्रज पुनर्निजनगरम्। परिपालय कुलतन्तुं तृतीयतनयम्।

**जयश्रीः**—( आश्वास्य सास्रम् )

किं तणओ[8] वि करिस्सदि विहवाए सव्वदुःखभरिदाए[9]।
तुह तादस्स कुमरणं असुणिय[10] पढमं मरिसु महं ॥ २८ ॥

( इति पतनं नाटयति। )

**वधूः**—( [11]स्वश्रूं धृत्वा ) अज्जे !

---

१. O. श्रुत्वा विलोक्य। २. B. omits ता। ३. O. वीरंब, B. omits अंब।
४. O. वाचेयेसि। ५. O. omits –शास्रं।
६. O. lacuna after राय upto महाराय। ७. O. ०सु देसु।
८. O. किं कुणं तु वि। ९. B. ०भरिदाय।
१०. O. असुंणिय। ११. O. स्वसूं।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तादस्य तुह य मरणं असुणिय विसणं च अज्जउत्तस्स ।
सव्वाणं य[1] पढमतरं जलणे देहं प्पविस्समहं ॥ २९ ॥

( अहं प्रथममहं प्रथममिति कलहं नाटयन्ति । )

**भीमः**—( विचिन्त्य ) वृथा पतङ्गपथि वर्तमानं निवारयामि निर्नाथं नरनाथ-कुट( टु )म्बकम्[2] । ( इत्युपसर्पति )

**जयश्रीः**—( भीमं दृष्ट्वा पादयोः पतित्वा ) महाराय जरासन्ध ! रख रख ( रक्ख रक्ख ) मम भर्तारं तणयं च ।

**वीरः**—( विलोक्य ) अम्ब ! नाऽयं मागधः । ब्राह्मणोऽयम् । ब्रह्मन् ! माऽस्मन्मरणदुःखभागी[3] भव । व्रज निजप्रयोजनाय ।

**भीमः**—( सान्तःस्मितम् ) वीरवर्मन् ! भवदतुलतपस्तोषप्रत्यक्षीभूतो विप्ररूपी भीमोऽहम्[4] । तदर्थयाऽभिलषितम् ।

**वीरः**—( सहर्षं नमस्कृत्य ) भगवन् त्रिलोचन ! तव[5] प्रसादात् ससुतो जय-वर्मा[6] मुच्यताम् ।

**भीमः**—वत्स ! अद्य निखिलनरपतीनां मोक्षो भविता । भवद्भिः पुनरिह न स्थातव्यम् ।

**वीरः**—यदाज्ञापयति भवान् ! ( इति पुनः प्रणम्य समातृकलत्रो निष्क्रान्तः । )

**भीमः**—( विलोक्य ) उदितो भगवान्भानुः । अहमपि स्वस्थाने ( न ) उप-विशामि । ( इति तथा कृत्वा ) कथं चिरयतः[7] कृष्णार्जुनौ ।

( प्रविश्य कृष्णार्जुनावुपविशतः । )

**भीमः**—कृष्ण ! सम्पन्नो गिरिव्रजप्रवेशावसरः ।

**कृष्णः**—भीम ! निपतति रजनिचरकृता पाषाणसंहतिः । तत्रेह सन्निधातुं शक्यते ।

**भीमः**—( उत्थाय भुजमास्फोट्य च ) आः केऽमी मम पुरतो[8] निशाचराधमाः[9] ।

**कृष्णः**—( सानुनयं करे कृ( धृ )त्वोपवेश्य ) भीम ! नाऽयमवसरो विक्र-मस्य । तृतीयोपायसाध्यमिदम् ।

---

१. O. सव्वायणं; B. सव्वाणय । २. O. कुटुंब । ३. O. -दुःखवीभागी ।
४. O. भूमोहं । ५. O. त dropped in तव । ६. O. जयवयम्र्मा ।
७. O. omits after यतः up to प्रविश्य कृष्णार्जुनौ ।
८. O. -दुरारुतो B. -पुरुतो । ९. O. -निशाचराः ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**भीमः**—कथमिव ।

**कृष्णः**—स्मर हिडम्बां हैडम्बेयं वा ।

( भीमः ध्यानं नाटयति । नेपथ्ये कलकलः । )

**अर्जुनः**—( श्रुत्वा विलोक्य च ) आर्य ! पश्य पश्य ।

मौलिन्यस्तास्थिमाला विकृतकहकहाकारवक्त्रा नराणां
धृत्वाऽशङ्कं करङ्कं [1]कटकटनिनदैर्भीषणं भक्षयन्तः ।
श्रोणीबद्धान्त्रयन्त्राः[2] पररुधिरसुरामस्थिपात्रैः पिबन्तः[3]
पापा रौद्रप्रलापा दिशि दिशि[4] बहुशो राक्षसाः सञ्चरन्ति ॥ ३० ॥

तदियं शान्ता वैतालोत्पत्तिः ।

**भीमः**[5]—वत्स घटोत्कच ! निजमनुचरगणं विनीय भवानिह लघु[6] विनयवपुषा गच्छतु ।

( ततः प्रविशति यथानिर्दिष्टो घटोत्कचः सविनयमुपसृत्य सर्वान् प्रणम्योपविशति । )

**भीमः**—( सहर्षम् ) वत्स ! निरामयोऽसि सह जनन्या परिजनेन च ।

**घटोत्कचः**—तातस्य प्रसादेन । किञ्चाऽनुगृहीतोऽस्मि स्मरणकृता तातेन । तत्किमपि[7] कृत्यमादिश्यताम् ।

**भीमः**—वत्स ! सम्प्रत्यस्माभिर्गिरित्रिजपुरं प्रविश्य छद्मना मागधो हन्तव्यः । [8]तदिमां दुर्गरक्षणकरीं जरामुपायेन सपरिजनां पर्वतान्तरं प्रापय ।

**घटोत्कचः**—[9]तात !

भूम्नैराहत्य रौद्रैर्गिरिनगरमिदं सप्रभुं चूर्णयामि
क्षुत्क्षामान् राक्षसांस्तानिदमशनमसृग्द्राक्प्रदायाशयामि ।
हित्वा लोकं वराकं किमथ मगधपं भक्षयामीक्षुदण्डं
खण्डं वा शर्करां[10] वा त्वमिह मयि सति क्लेशमाप्नोषि[11] कस्मात् ॥३१॥

---

१. O. -ककक्ट- । २. O. बंधांयत्राः । ३. O. lacuna for बंतः ।
४. O. प्रतिदिशि । ५. O. lacuna and मां for भीमः ।
६. B. भवानलघु । ७. O. lacuna & कमपि for तत्किमपि ।
८. O. lacuna for दि । ९. B. omits तात । १०. O. lacuna for शर्करां ।
११. O. -माप्नोति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**भीमः**—वत्स ! सर्वमिदं त्वयि सम्भाव्यते । पुनरिदं कर्म नाम[1] क्लेशकरम् । अतः पूर्वोक्तमेव सम्पादय ।

**घटोत्कचः**—( प्रणम्य ) यदाज्ञापयसि । ( इति निष्क्रान्तः । )

( नेपथ्ये )

अले ले लखस्सा[2] अज्ज अम्हाणं यदुच्चयघरे सामिणीए[3] जराए सह सौहिचं[4] ।

**कृष्णः**—( विलोक्य ) भीम !

हैडम्बेयहिडम्बाभ्यां जरा सानुवरा पराक् ।
नीतोपायेन देशान्तं शान्तं पाषाणवर्षणम् ॥ ३२ ॥

तदुत्थाय गिरिदुर्गभङ्गोपायमन्वेषयामः । ( तदुत्थाय सर्वे परिक्रामन्ति । )

**कृष्णः**—भीमसेन ! चैत्यकगिरिशिखरस्यास्य पातनेनैवान्तः प्रवेष्टुं शक्यम् ।

**भीमः**—कृष्ण !

शिरोऽभिपत्य प्रपदैर्निहत्य पातालमूलं प्रणयामि शैलम् ।
दोर्भ्यामथोत्पाट्य परिक्षिपामि मुष्टिप्रहारैरथ पातयामि ॥ ३३ ॥

**कृष्णः**—भीमार्जुनौ ! युवामेनं मुष्टिप्रहारैः शनैः शनैः पातयतम्[5] ।

( उभौ निष्क्रान्तौ । )

( नेपथ्ये पर्वतपतनध्वनिः । )

**कृष्णः**—( सहर्षम् ) हन्त ! [6]पातितोऽयं पर्वतः । दुर्गखण्डक्षोणिस्तु समैव[7] दृश्यते । ( इति परिक्रामति । ) ( प्रविश्य )

**भीमार्जुनौ**—कृष्ण ! पश्य पश्य, निजरिपुनगरम् ।

**कृष्णः**—तदिदं सकलधवलगृहव्रजं गिरिव्रजम्[8] । पश्य,

शुक्लाङ्गीं कलधौतनिर्मितमहाप्रासादपङ्क्तिं कैर-
रिन्दोरन्तरितामपश्यति मरुद्वाहव्रजे साम्यतः[9] ।

---

१. B. कर्म न मम ।
२. O. लखसा( ? लस्यसा ? ) अज्ज अम्वाणं वदुश्चदुयन्घरे ।
३. B. सामिए ।
४. O. ससौहित्यं ।
५. O. घातयतं ।
६. B. पतितोऽयं ।
७. O. समैवं ।
८. O. omits गिरिव्रजं ।
९. B. साम्यता ।

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

नक्तं प्रस्खलिता विमाननिवहा वैमानिकानां मुहु-
यैस्मिन् सारथिरश्मिकर्षणकृतायासेन यान्त्यग्रतः ॥ ३४ ॥

अपि च—

इह स मगधपतिर्महेन्द्र इव खेलयति[1] । पश्य,

यस्योच्चैर्गृहचन्द्रमण्डलमिलत्सच्चन्द्रशालातले
संविष्टस्य[2] वरिष्ठमूर्धमकुटानादित्सतश्चापलात् ।
प्राग्वैरात्कुपितैरुपान्तगतिभिः सन्मृत्युवैमानिकी-
भूतैर्भूपतिभिः प्रभूतसमरं वाग्डम्बरं वर्त्तते ॥ ३५ ॥

**कृष्णः**—(पुरप्रवेशनाटितकेन) आचार्य राजशेखर ! पश्य पश्य, मगधसमृद्धिम् ।

**राजशेखरः**—चक्रधरधवलौ[3] पश्यतम् ।

रम्याट्टावयवो दुकूलसकलो मुक्ताफलैरुज्ज्वलै-
र्हीरैरब्धिसमः [4]सुगन्धिकुसुमः श्रीखण्डकस्तूरिकः ।
सच्छस्त्राणि निशाणयन् क्रयिकुलार्थिभ्यश्च कामं ददत्[5]
धीरो वीर इवापणः कलकलत्युन्मत्तलोकैर्वृतः ॥ ३६ ॥

(विचिन्त्य) इहाहं धवलश्च सुरभिकुसुमानुलेपनताम्बूलादिकं बलेनादाय नवतरमरिदुर्विलसितं दर्शयावः ।

**चक्रधरः**—यदभिरुचितं भवतोः ।

(उभौ निष्क्रान्तौ ।)

(नेपथ्ये)

भो भो धावत धावत ब्रह्माणाविमौ बलेन वसु गृही( ही )तः ।

**चक्रधरः**—भो भो वणिजः ! मा प्रलपत । यतः

सर्वस्वं ब्राह्मणस्येदं यत्किञ्चिज्जगतीगतम् ।
आनृशंस्याद्धि[6] विप्राणां भुञ्जतेऽपीतरे[7] जनाः ॥ ३७ ॥

---

१. B. खेलति । २. B. संविष्टश्च । O. सविष्टस्य विरिष्ट० ।
३. B. चक्रधवलौ । ४. O. सुगन्ध० । ५. O. दधत् ।
६. B. आनृशंस्या । ७. O. पितरे ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इति स्मृतिवचनम् ।

( ततः प्रविशति राजशेखरो धवलश्च । )

**चक्रधरः**—आचार्य सुविभूषितौ युवाम् । पुनरस्य राज्ञः श्रूयतां प्रभावः ।

कस्त्वं मद्भुवि मागधोऽस्मि नृपहा नेहाविशेन्मद्दिशि
त्वं कोऽहं क्षितिपस्तवैव सदृशां हन्ताऽहमेह्येहि माम् ।
इत्थं स्वप्नगिरीक्षिते[1]ऽत्र नृपतौ बुध्वा[2] भियैतादृशः
प्रागुक्तं विवदन्ति वेश्मनि पलायन्ते च पृथ्वीश्वराः ॥ ३८ ॥

( इति सर्वे परिक्रामन्ति । )

**धवलः**—आचार्य ! इयं राजभवनप्रतोली । ( प्रवेशनाटितकेन ) इदमनिशं[3] प्रवर्तमानकुतक( र्क )गणं राजाङ्गणम् ।

पश्य पश्य,[4]

एता नित्यमदोत्कटा गजघटास्तुङ्गास्तुरङ्गा इमे
नानारत्नरुचीन्द्रचापरुचिरा हृन्नन्दनाः स्यन्दनाः[5] ।
एते पत्तिगणाः स्फुरद्द्युतिकणाश्चैते लसल्लेखनी-
कर्णा वर्णनियोगिनो लिपिकपित्र्याक्षिप्तसम्पत्फलाः ॥ ३९ ॥

( पुरो विलोक्य ) इदमिह यज्ञसदनम् । यत्र,

एते व्याकृतवेदवाक्यनिपुणा मीमांसकानां वरा
ब्रह्मात्मैक[6]विदः श्रुतोपनिषदश्चैतेऽस्त्र( त्र ) विद्याविदः ।
एते कर्कशतर्कवादकुशलाश्चैते पुराणार्गला
यज्वानश्च पुरः प्रतर्पितसुरश्रेण्यो वरेण्यौजसः ॥ ४० ॥

**चक्रधरः**—( विलोक्य ) भो भो इह कश्चिदस्ति मुनिः ?

( प्रविश्य )

**बटुः**—( सविनयं सर्वानभिवाद्य चक्रधरं प्रति ) ब्रह्मन् ! किंनामाऽयं भवद्गुरुः ।

**चक्रधरः**—मध्यदेशवासी[7] राजशेखरनामाऽस्मदाचार्यः ।

---

१. B. निरीक्षिते०, O. गिरिक्षितेश्च । २. B. बुध्वा । ३. O. मादितकेनमनिशं ।
४. B. omits the repetition. ५. O. -दनस्यंदनाः । ६. B. ब्रह्मात्म्यैक- ।
७. B. मध्यमदेशी ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**बटुः**—( सविनयम् ) आचार्य राजशेखरः( र ) ! चण्डकौशिकमुनिर्गौतमो भवन्तं सशिष्यमाह्वयति । यूयं राजमेधर्त्विजो भवध्वमिति ज्ञपयति च ।

**चक्रधरः**—ब्रह्मन् ! आचार्य( र्यः ) कार्यवानिदानीं प्रथममिह राजानं दिदृक्षते[1] । क्व च राजा वर्तते ?

**बटुः**—इह निकटवर्त्मनि[2] भवने ब्राह्मणानर्चयति ।

( इति निष्क्रान्तः )

**राजशेखरः**—चक्रधर ! मुनिरयं त्रिकालज्ञोऽपि मगधव[ ति ]वध[3]नृपतिमोक्षोद्यमं न जानाति । येनास्मानपि राजमेधार्त्विज्ये[4] वृणोति ।

**चक्रधरः**—आचार्य !

भवद्भूतभविष्याणि जानन्तोऽपि मुनीश्वराः ।
प्रकाशयन्ति न जने देवगुह्यनिगूहनात् ॥ ४१ ॥

**राजशेखरः**—तर्हि वयं राजानं पश्यामः ।

( इति परिक्रामन्ति )

**चक्रधरः**—( विलोक्य ) इदं [5]प्रतीहारस्थानम् । भो भोः ! प्रतीहार[6] !!

( प्रविश्य )

**प्रतीहारः**—( प्रणम्य ) आज्ञापयन्तु भवन्तः ।

**चक्रधरः**—भद्र ! राजशेखराचार्यं सशिष्यमागतं राज्ञे निवेदय ।

**प्रतीहारः**—( सविनयम्[7] ) आचार्य ! नाऽत्र विप्रमात्राणामपि द्वारावरोधः । किं पुनर्भवतां प्रभवताम्[8] ।

( इति निष्क्रान्तः । )

**चक्रधरः**—( सविनयम् ) प्रविशत्वभ्यन्तरमाचार्यः ।

( सर्वे प्रवेशं नाटयन्ति । )

**चक्रधरः**—( विलोक्य सहर्षम् ) आचार्य ! पश्य, पश्य ।

---

१. O. राजासंदिदृक्षते । २. O. –कर्मनि, B. –चर्मनि । ३. O. मगधवध–, B. मगधपवध– । ४. O. राजमेधार्त्विजो । ५. ६. O. प्रतिहार । ७. O. सविजयं । ८. O. omits प्रभवतां ।

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

स्नातः स्रग्वी प्रसन्नो द्रुतकनकनिभं धौत्रयुग्मं दधानो
दोर्युग्मेऽप्यङ्गदं च प्रवरकुशमयीं पाणियुग्मे पवित्रीम् ।
पादप्रक्षालनाम्बु स्वशिरसि च नयन्ब्राह्मणानां प्रणम्य
प्रीतः[१] पुण्योपगीतः स मगधनृपतिर्दृश्यते सन्निविष्टः ॥ ४२ ॥

( ततः प्रविशति यथानिर्दिष्टो जरासन्धोऽर्घपाद्यसामग्रीसहितो[२] गुरुश्च । )

**जरासन्धः**—भगवन् चण्डकौशिकशिष्य !

समाहृताः सर्वसत्त्वोपहारा धृताः शतं भूपतयः ससाराः ।
न वाडवानां मम [३]सन्निवेशः प्रवर्तते किं न स राजमेधः ॥ ४३ ॥

**गुरुः**—राजन् ! नाद्यापि योग्यर्त्विजः[४] पूर्यन्ते ।

**जरासन्धः**—( पुरो विलोक्य सहर्षम् । )

ब्रह्मादयो वा निगमाश्रयो[५] वा हविर्भुजो वा त्रिजगद्गुजो वा ।
दिगीश्वरा वाऽथ मुनीश्वरा वा केऽमी वपुर्धारिनृपादयो वा ॥ ४४ ॥

भवतु सर्वथाऽभ्युपगच्छामि । ( इत्युत्थायोपसृत्य प्रणमति । )

**राजशेखरादयः**—स्वस्ति भवते ।

**गुरुः**—( उपसृत्य ) अहं भो अभिवादयामि ।

( सर्वे यथोचितमाचरन्ति । )

**जरासन्धः**—( पुनः प्रणम्य सविनयम् ) भो मुनयः[६] ! स्वागतं वः । इमान्यासनान्यलङ्क्रियता( न्ता )म् ।

( सर्वे यथोचितमुपविशन्ति । )

**जरासन्धः**—( प्राञ्जलिः[७] सविनयं ) तत्रभवन्तः !

देशेषु सर्वेषु मया विसृष्टा[८] विप्रोत्तमानानयितुं वरिष्ठाः[९] ।
अभ्यर्थ्य तैरत्र समाहृता वा यूयं स्वयं मे कृपयागता वा ॥ ४५ ॥

---

१. O. प्रतीतः । २. O. -सग्रीसहितो । B. -सामग्रीभूतो ।
३. O. omits after ममसं up to the end of verse ४७ here and inserts the same after मे...... on the verse ५६ ।
४. B. योग्याऋत्वगः । ५. O. Marginal note ऋचो यजूंषि सामानि सा हि श्रीरमृता सतां ।
६. B. मनुयः । ७. O. Marginal note सम्पुटीकृतशयः ।
८. B. निसृष्टा । ९. B. विशष्ठाः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तत्सर्वथा——

अद्याऽन्वयो मे विमलोऽखिलोऽपि पूतस्तथाहं पृथुकल्मु(ल्म)षोऽपि[1]।
यदागमन्मे भवने[2] मुनीन्द्रा हु(ह)ता महेशस्य मखे क्षितीन्द्राः ॥ ४६ ॥

तदिदमर्घ्य[3]पाद्यादिकमर्चनं प्रतिगृह्यताम् ।

( गुरुरर्घ्योप[4]हारादिकमुपनयति । )

**राजशेखरः**—( स्वगतं ) कथमर्घ्य[5]मादाय हन्तव्योऽयम् । अहतश्च नायं महीपतीन्मोचयति । ( प्रकाशं पादावुपसारयन् ) न हि न हि वयमर्घ्य[6]माददामः ।

**जरासन्धः**—( सखेदम् ) तत्रभवन्तः ! के यूयम् ?

**राजशेखरः**—द्विजातयो वयम् ।

**जरासन्धः**—( सर्वान् सम्यङ् निरूप्य स्वगतं ) नूनममी नः( न )[7]ब्राह्मणा मयि विषमदृष्टयश्च[8] । ( प्रकाशं ) भो ! द्विजातयः !

अन्तर्माल्यानुलेपान्[9] दधति[10] न हि बहिः स्नातका ब्राह्मणा ये
वासश्चित्रं न रक्तं न च धवलतरं धर्मतो धारयन्ति ।
वेशोऽयं क्षत्रियाणामवयवसहितो वाचि तु ब्राह्मणत्वं[11]
के यूयं[12] सत्यमेव प्रवदत न मृषावादिनः क्षत्रिया हि ॥ ४७ ॥

( प्रविश्य )

**प्रतीहारः**—मगधपते !

निपात्य चैत्यकं[13] शृङ्गं त्रयः केऽपि द्विजातयः ।
अद्वारेण पुरं विष्टा न दृष्टा द्वारि केनचित् ॥ ४८ ॥

**जरासन्धः**—गच्छत द्वारि तिष्ठत[14] । ब्राह्मणोऽप्यवि[दि]तो[15] मोक्तव्यः । ( पुनः सोपालम्भं ) भो भो ! अभ्यागतानां न क्वचिद् द्वारेणागमनमर्हणानङ्गीकरणं च । अतः सत्यमुच्यताम् । के यूयं किं प्रयोजनाश्च ।

---

१. O. -कल्मखोपि, B. कल्मुखोपि । २. O. भुवने । ३. B. -मर्घं- ।
४. B. -अर्घोप- । ५. B. ०मर्घ० । ६. B. मर्घ ।
७. B. omits न । ८. O. marginal note द्विजाः मयि विषये संगजन्यं वैषम्यं धारयंतः । ९. O. माल्यावलेपान् । १०. B. दधिति ।
११. O. ब्राह्मणानां । १२. O. केयूरं ।
१३. O. lacuna for त्य । १४. O. गच्छद्वारि तिष्टन् । १५. O. ब्राह्मणोप्यवदितो ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**राजशेखरः**—मागध !

श्रुतितः प्रथिता द्विजातयो जगति क्षत्रियवैश्यवाडवाः ।
किमलीकमिदं मनस्विनः प्रतिगृह्णन्ति न वैरिसत्कृतिम् ॥ ४९ ॥

अपि च—

क्षत्रियाः किल जयेहया[१] बहिश्चन्दनं च कुसुमं च बिभ्रति ।
अर्चयन्ति भुजयोर्बलं हि नस्तद्दिदृक्षसि यदि प्रपश्यसि ॥ ५० ॥

अपि च—

असुहृद्गृहमाविशेत्सुधीः स्वहितेच्छुः[२] कथमुत्पथेन न[३] ।
सुहृदस्तु गृहं पथा विशेदिति नीतिं निपुणा वदन्ति हि[४] ॥ ५१ ॥

प्रयोजनं च वैरिभु(भ)[५]वनप्रवेशे प्रथितमेव ।

**जरासन्धः**—भो द्विजातयः !

अपकारपरो रिपुर्नृणां न हि तज्जातिरिहास्ति शाश्वती ।
भवतां न मया न मेऽनुगैर्न च तैर्वा[६]ऽपकृतं स्मराम्यहम्[७] ॥ ५२ ॥

अथवा—

यूयमङ्ग वरवाडवा यदि क्षन्तुमर्हथ कृतोऽयमञ्जलिः ।
क्षत्रिया यदि तदाशु कथ्यतामुत्तरं मम भुजौ करिष्यतः ॥ ५३ ॥

**राजशेखरः**—मगध !

आगः स्यात्तनु यन्महच्च न मुहुः क्षान्तैस्ततः क्षम्यते
तान्यागांसि महान्ति ते प्रतिदिनं कः क्षन्तुमत्र क्षमः ।
येन क्षत्रकुलं विधृत्य सकलं हव्यं यथा हूयते
तेन ज्ञातिवधार्थिना कुमतिना कः पीडितो न त्वया ॥ ५४ ॥

अपि च—

---

१. O. marginal note विजयवांछया । B. कपलजेहया । २. O. —हितेछुः ।
३. O. ०मुच्यतेनन B. ०त्पथे न च । ४. O. omits हि । ५. O. lacuna for भ ।
६. O. ०र्नमतैर्वा० । ७. O. सहाम्यहं ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दिक्पा ये क्षितिपाश्च यागरुचयः केनाऽपि भूमीभुजो ।
हव्यं नो विहिता:[1] श्रुतावपि विधिर्दृष्टो न शिष्टैरयम् ।
ये रुद्रैकमखा दशाननमुखास्तेऽप्यात्मदेहं हवि-
श्चक्रुस्त्वं तु वृथामतिः प्रकुरुषे यत्तत्पिशाचो[2] यथा ॥ ५५ ॥

किं च—

एषोऽहं निजवीर्यनिर्जितजगद्भीमोऽन्यधीमोहनः
कृष्णोऽयं परदर्पसर्पगरुडो गर्जत्यसावर्जुनः ।
मुञ्च क्षोणिभुजस्त्यजा[3]न्तररजस्तं[4] धर्मराजं[5] भज
स्वं शान्तं च सृज व्रजस्यपरथा प्रेताधिपस्यालयम् ॥ ५६ ॥

**जरासन्धः**—( स्वगतं सखेदं ) अहो ! दैवस्य विजृम्भितम् ।

भेरी[6] भिन्ना जरा जीर्णा शीर्णाः प्राकारपर्वताः ।
कर्मणा मर्मविज्ञा मे[7] रिपवो रोपिताः[8] पुरः ॥ ५७ ॥

अपि च—

ममापरं शरीरं यौ सङ्कटे च सहायिनौ ।
तौ हंसडिभकौ पूर्वं[9] कालेन बलिना हतौ ॥ ५८ ॥

**( धैर्यमवलम्ब्य, प्रकाशम् )**

भो भीम !

जगतीविजये हि[10] धर्मवानिति मुक्तः स मया युधिष्ठिरः ।
स तमङ्गपतिं रणे मया जितमात्रं समकारयत् समम् ॥ ५९ ॥

( कृष्णं प्रति ) भो यादवकुलपांसन !

शतशो विजितोऽसि संयुगे सह पुत्रैः सह सीरपाणिना ।
प्रविहाय पुरीं पलायितः[11] परिलीनोऽसि पयस्सु वारिधेः[12] ॥ ६० ॥

---

१. B. विहताः ।    २. O. यप्रत्पित्तिशाचो ।
३. B. सृजा–( sic ) ।    ४. O. Foot-note विक्षेपात्मकं ।
५. O. ०राजधर्म– marginal note अभिषेकादि गुणयुक्तस्य राज्ञः प्रजाऽवनलक्षणो परमो धर्मः ।
६. O. lacuna for री and inserts here, on f. 8. b, the text from निषेधः up to the end of verse 43 ( see foot-note 3 on page 15 above) and then again on f. 9a after v. 47 the texts starts "न्राजराजीर्णा etc. ).    ७. O. –विज्ञाने ।    ८. O. रेषिताः ।    ९. O. पूर्व० ।
१०. O. विजयेति ।    ११. B. पलायतः ।    १२. B, वावारिधे for वारिधे ।

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

अपि च—

पराजितानां युधि वः प्रसह्य महीपतीन्मोचयतां न लज्जा[1]।
ते देवतार्थं परिकल्पिता[2] मे सेन्द्रैः सुरैर्मोचयितुं न शक्याः ॥ ६१ ॥

किं च, समरेच्छामपि भवतामपनयामि ।

( गुरुं प्रति ) ब्रह्मन् ! महामात्यसामन्तप्रमुखाः प्रकृतीरानीय भगवत[3]श्चण्डकौशिकस्य हस्तेन सहदेवस्य पट्टाभिषेकं कारय ।

**गुरुः**—यदाज्ञापयसि ( इति निष्क्रान्तः । )

( नेपथ्ये मङ्गलगीतध्वनिर्नान्दीवाद्यं च )

**कृष्णः**—भो मागध ! [4]कटुवादिनमपि भवन्तं पूर्वपालितमिति हन्तुं मनो विचिकित्सत्यस्माकम् । अतः किञ्चिदुच्यते ।

विमुञ्च नृपतीन् रुद्धान्सम्मानय युधिष्ठिरम् ।
मागधाः कुरवश्चैव नन्दन्तु सुहृदो यथा ॥ ६२ ॥

**जरासन्धः**—( सक्रोधम् ) दुराचार मातुलकुलवैरिन्[5] !

त्वत्कृत [6]एवायमनर्थो मागधकुरूणाम् ।

**कृष्णः**—बार्हद्रथ[7] ! यद्येवं भवता सह द्वन्द्वयोधनाय कोऽस्माकं सज्जीभवतु ?

**जरासन्धः**—( साहङ्कारम् )

यूयं त्रयो वा द्वौ वेह[8] एको वाऽद्य मया सह ।
युगपद्वा पृथग्वाऽपि सज्जीभवतु युध्यते[9] ॥ ६३ ॥

**कृष्णः**—मागध ! नाऽयं क्षत्रधर्मः । एकमेवास्माकं वृणुष्व[10] ।

**जरासन्धः**—( सगर्हम् ) भो यादवाधम[11] ।

त्वं पुरैव विजितोऽसि[12] वाक्पटुः फाल्गुनोऽपि किल फल्गुयुद्धकृत् ।
संयुगेषु भुजवीर्यशालिनं भीमसेनमहमुद्धतं वृणे ॥ ६४ ॥

---

१. O. Marginal note अकरणात् हीनें भजसे । २. B. परिकल्पता ।
३. O. भवत० । ४. O. पटु– ।
५. O. Marginal note कंसव्याहननेन मातुलकु[ ल ]घातिन् । ६. O. त्वत्कृतो वा० ।
७. O. बर्हद्रथ । B. वारिहद्रथ । ८. O. चेह । ९. B. भवत युध्यतः ।
१०. O. वृणुथ । ११. O. यादव for भो यादवाधम and marginal note on यादवाऽधमः महामायाविना देवान् पृष्ठतो रक्षकेन । १२. O. omits ऽसि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

( नेपथ्ये )

साधु, साधु, मगधपते ! साधु ।

**कृष्णः**—( स्वगतम् ) समरकौतुकाभिलाषिणः सुराः प्रशंसन्ति मागधम् । ( प्रकाशम् ) भीमसेन ! सज्जीभवतु भवान् ।

**भीमः**—( उत्थाय परिकरं बध्वा[१] ) मागध ! गृहाणाऽभिमतशस्त्राणि सन्नहनं च।

अपि च—

निरायुधः सायुधेन सन्नद्धेन त्वनावृतः ।
पदातिश्च[२] रथस्थेन योत्स्येऽहं भवता सह ॥ ६५ ॥

( नेपथ्ये )

साधु भीमसेन साधु !

**जरासन्धः**—भीम ! नाऽयमपि क्षत्रियधर्मः । त्वमपि मया सह निर्गत्य सन्नद्धः सायुधश्च भव[३] ।

( इत्युभौ निष्क्रम्य सन्नद्धौ सगदायुधौ[४] प्रविशतः [५]सुमङ्गलसामग्रीकः पुरोहितश्च । पुरोहितः[६] जरासन्धस्य मङ्गलं स्वस्त्ययनं च करोत्युपहारं कृष्णस्यार्पयति च ।

**कृष्णः**—स्वस्त्ययनं भीमसेनस्य[७] च करोति[८] ।

**जरासन्धः**—भीम ! इयमिह पदचतुष्टयान्तरे समरभूमिस्तदिह द्वन्द्वकलहकेलिमनुभवावः ।

**भीमः**—यदभिरुचितं[९] भवतः ।

( इति सपुरोहितौ निष्क्रान्तौ । )

**कृष्णः**—अर्जुन ! आवामप्युच्चैः स्थानेऽस्मिन्नुपविश्य पश्यावः कलहम् ।

---

१. O. Marginal note पीताम्बरेण परिकरं बध्वा ।
२. O. Marginal note यस्यांहियातं रणभूर्न सेहे मार्गे गदायाश्चरतो विचित्रं ।
३. O. भवता । B. inserts इव after भव ।
४. B. सगायुधौ । ५. O. स- । ६. O. omits पुरोहितः ।
७. O. भीमस्य स्वस्त्ययनं for स्वस्त्ययनं भीमसेनस्य । ८. O. inserts कृष्ण भीमस्य after करोति । ९. O. repeats यदभिरुचितं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

( तथा कुरुतः )

**कृष्णः**[1]—( विलोक्य ) पार्थ ! पश्य पश्य

[2]मागधान्मगधपत्यसम्मतान्वीक्षणाय परिवीक्ष्य सङ्गतान् !
स्पर्धयेव बहु भीमसम्मतैः कौरवैर्दिशि दिशि प्रजृम्भितम् ॥ ६६ ॥

अपि च—

एतयोः परिविवर्तिभिर्नरैर्मूर्तिभित्तिमभिवीक्ष्य निर्मिताम् ।
दैवतैरभिमतैरिवोपरि च्छादनं व्यरचि [3]विग्रहव्रजैः ॥ ६७ ॥

**अर्जुनः**—कृष्ण ! पश्यैतौ ।

अन्योन्यमुद्यत्प्रतिघाग्निवृष्ट्या दृष्ट्या दहन्ताविव दीर्घनादौ ।
समीयतुर्वासववृत्रतुल्यौ कल्पौ गदायोधनशासनेषु ॥ ६८ ॥

( पुनर्निर्वर्ण्य ) कृष्ण !

एतच्चण्डगदाहतिस्फुटतडित्त्राट्कारकोटिस्फुट-
दूर्भग्रावगणानि किं कुत( तु )किनो धुन्वन्ति कान्यद्रयः ।
एतत्पादधमद्धमत्कृतिधुता सन्देहदोलास्थिता
मुग्धेयं मगधा[4] सुधागृहसहा[5] किं शङ्किता कम्पते ॥ ६९ ॥

अपि च—

[6]तूर्यश्वासवहन्महद्धमनिकासम्पूर्णकोपानल-
ज्वालासंवलिताङ्गकुट्टनकरौ स्वर्ग्यौ सृजन्तौ तनू[7] ।
स्फूर्जद्गाढगदाघनाहतिलसद्रङ्गत्स्फुलिङ्गावृतौ[8]
स्रष्टुः कर्मकराविव स्फुटतमौ पश्यामि वीराविमौ ॥ ७० ॥

**कृष्णः**—( विभाव्य ) भीमानुज ! पश्य पश्य,

दृढगदाहतिभिन्नतनुत्रयोर्वपुषिविक्षतयोरनयोरसृक् ।
वहति निर्झरणं गिरिवर्ययोररुणयोरिव गैरिकधातुभिः ॥ ७१ ॥

---

१. B. omits कृष्णः । २. O. मागभात्वमगधिपश्य । ३. O. inserts शरीरगह after विग्रह । ४. O. वसुधा । ५. B. ०सहगृहा । ६. O. तूर्यश्वासमहन्मधमनिका । ७. O. वतू । ८. O. –गाहतौ ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अपि च--

भ्राम्यद्भास्वरघोरघूत्कृति[1]गदे सङ्घट्यमाने [2]जवात्
काट्कारैः कटुभिः [3]सुरोरगनरान्सम्मोहयन्त्यौ मुहुः ।
भग्ने, भूरिबलाविमौ वितनुतस्तन्मल्लयुद्धं पुन-
र्यस्मिन्सत्यमराः स्मरन्ति रुचिरं चाणूरयुद्धं चिरात् ॥ ७२ ॥

किञ्च--

चण्डमुण्डचपेटाभिर्जानुकूर्परमुष्टिभिः ।
एतौ कृतान्तवत्क्रुद्धौ युध्यतो निर्व्यथौ मिथः ॥ ७३ ॥

अपि च--

वज्रं भूमिधरं भिनत्तु न पुनस्तन्मुष्टितुल्यं भवे-
द्यद्घातोत्कटविस्फुटत्कटकटत्कारप्रतिध्वानतः ।
दीर्यन्ते गिरयोऽपि ते दृढतमाः किं तत्समा ये मुहु-
स्तन्मानाधिकमुष्टिकोटिनिहतेऽप्यङ्गे विभङ्गेऽनयोः ॥ ७४ ॥

किञ्च आकर्षणविकर्षणापक[4]र्षणविधूननिपातनोत्क्षेपणाधःपतनविघर्षणादिषु नान्तरमनयोर्दृश्यते ।

यतः--

मारुतौ मम तेजोऽस्ति माहेशं मागधे महः[5] ।
आवयोरेककार्यत्वादूनाधिक्यं विलोक्यते ॥ ७५ ॥

अतश्च पश्य मगधपतिं हीयमानम् ।

**अर्जुनः**--कृष्ण ! सत्यमिदम् । लघुलुलितपदपातो मागधः ।

किञ्च--

---

१. B. -घूत्कृत- ।
२. O. lacuna for ज । B. हवात ।
३. O. सुरोरगगणान् ।
४. O. आकर्षण*कविकर्षणाप- ।
५. O. The line is repeated in the margin with reading मारुतो for मारुतौ, obviously by another hand.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भीममुष्टिहतिभिन्नभालकः प्रस्खलन् पतति मागधः क्षितौ ।
अक्षताङ्ग इव [1]तत्क्षणादथोत्थाय युध्यति तथैव निर्व्यथः ॥ ७६ ॥

अपि च—

पार्थपादपविनाऽऽहतो हृदि प्रोद्गिरद्रुधिरवक्त्रकन्दरः ।
मागधो गिरिरसौ पतत्यथोत्तिष्ठति प्रहरति प्रवल्गति ॥ ७७ ॥

( चिरं [2]निर्वर्ण्य सविस्मयम् )

कृष्ण कृष्ण[3] !

पाण्डवः खण्डयत्येनमुत्तिष्ठति नृपोऽक्षितः ।
वारानष्टादशैवं स पातितः पुनरुत्थितः ॥ ७८ ॥

( पुनर्निरूप्य ) यदुनन्दन ! पश्य पश्य, कुपितभीमसेनस्य [4]विक्रमम् ।

कलितचरणयुग्मं भ्रामयित्वा भुजाभ्यां
शिरसि धरणिपीठे स्फोटयत्येष शेषात् ।
शकलितमथ भूयो सम्मिलन्तं नृपं तं[5]
प्रहतिपृथुलनादैर्मङ्क्षु मृद्नाति पादैः ॥ ७९ ॥

( पुनः सगर्हम् ) कृष्ण ! नाऽयं [6]क्षात्रधर्मः ।

**कृष्णः**—( नेपथ्यं प्रति ) पाण्डुनन्दन ! किमप्युन्मत्त इव चेष्टसे । नाऽयमतिकदर्थितोऽपि [8]मर्मभेदमृते जीवितं मुञ्चति ।

( नेपथ्ये—**भीमः**—कृष्ण कृष्ण ! विलोकय मम[9] कृतम् । )

**अर्जुनः**—कृष्ण कृष्ण ! अभिनवसमरारम्भरसिक इव भूपोऽयम् ।

अपि च—

समिति शक्ततरं मगधेश्वरं गतदरं[10] प्रहरन्तमिवाऽमरम् ।
हृदि निहत्य निपात्य पदा हृदाऽऽक्रमति तर्जति गर्जति मेऽग्रजः ॥ ८० ॥

अपि च—

१. O. omits तत् ।
२. Both O. and B. read निवर्ण्य ।
३. O. omits second कृष्ण ।
४. B. परा– ।
५. O. omits तं ।
६. O. omits क्षात्र– ।
७. O. omits अपि ।
८. O. मम for मर्म– ।
९. O. मत्– ।
१०. B. दरं– ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आक्रम्यैकं पदाभ्यामपरमवनिपस्योरुमादाय दोर्भ्यां

पायोः पूर्वं पुरं तत्तडतडितिकरं पाटयत्येष पार्थः ।

( कर्णौ पिधाय )

क्रन्दैरत्यात्यमन्दैः स्फुटति गिरिदरी गाढगर्भा[1] गलन्ति

स्त्रीणां नृणां समूहाः पवि[ नृप ]मरणदृशः सर्वशः संपतन्ति ॥ ८१ ॥

( नेपथ्ये—भो भो नागरिकाः क्षत्र( त्रि )याश्च मा पलायु( य )ध्वम् । हतोऽस्माभिरपराधी मागधः । क्रियतामस्य कलेवरनिष्कालनम्[2] । अभयमस्ति सहदेवस्य सपरिवारस्य[3] ।)

( ततः प्रविशति समरधूलिधूसरः क्षतजप्रलिप्ताखिलशरीरः समरविजयाभिरामो भीमः )

**भीमः**—( सहर्षमुपसृत्य ) कृष्ण ! दिष्ट्या वर्धसे[4] निखिलक्षत्रिकुलरिपुवधेन । ( भुजमास्फोट्य सगर्वं ) कृष्ण !

विदार्य तं[5] तच्छकलद्वयं तन्मया पृथग्दिग्युगले निरस्तम् ।

जरा हरो वाऽथ तयोर्वैरो वा यस्यास्ति[6] शक्तिः स तु संदधातु ॥ ८२ ॥

**कृष्णः**—भीम ! श्रान्तोऽसि क्षणमिहोपविश ।

**भीमः**—न हि न हि । अद्यापि मुख्यकरणीयमवशिष्यते[7] ।

**अर्जुनः**—तर्त्कि[8] मया न सिध्यति ।

**भीमः**—न हि न हि स्वयमहं[9] नियतनृपतीन्मोचयामि ।

**कृष्णः**—तर्हि त्वर्यताम् ।

( भीमो निष्क्रान्तः । नेपथ्ये कलकलः )

**अर्जुनः**—कृष्ण ! किमिहाऽपि केनचिदार्यस्य सङ्गरोऽस्ति ।

**कृष्णः**—न हि न हि । पलायमानजनसम्भ्रमोऽयम् ।

---

१. O. lacuna from गर्भा up to अपराधी ।
२. O. कलेवरनिःकाल ।
३. B. सपरिवारस्य in margin.
४. B. वर्धयसे ।
५. O. तावत् for तं तत् ।
६. O. अस्य for यस्य ।
७. B. अप- for अव- ।
८. O. किं तत् for तर्त्कि ।
९. O. यमहं for स्वयमहं ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

( प्रविश्य )

भीमः—कृष्ण !

मां वीक्ष्य कारागृहरक्षपालाः पलायिताः क्वापि गता भयेन ।
मयाऽथ भङ्क्त्वा निगडानि भूपा मुक्ताः समस्ताः पुरुषाः परेऽपि ॥ ८३ ॥

इह समानीताश्च ।

( नेपथ्ये )

नमो नमः कारणमानवाय नमो नमस्ते पुरुषोत्तमाय ।
यस्य[1] प्रसादादिह नः कृतान्तवक्रोपमाद्बन्धनतो विमुक्तिः ॥ ८४ ॥

**कृष्णः**—भूपतयः[2] ! व्रजन्तु भवन्तो [3]निजनिजनगराणि । संगच्छतां( न्तां )च पुत्रकलत्रादिभिः । समाहूतैश्च युधिष्ठिरयागे[4] समेतव्यम् ।

( नेपथ्ये )

यदाज्ञापयति देवः ।

**अर्जुनः**—कृष्ण ! अयं कश्चिद्राजपुत्र इवोपैति ।

( प्रविश्य विनीतवेषः )

सहदेवः ( सर्वान् प्रणम्य )—भगवन् कृष्ण ! तत्रभवन्तौ भीमार्जुनौ !

इदं शरीरं मगधाधिराज्यं प्राज्यं बलं पुत्रकलत्रकोशाः ।
समर्पितं वः सकलं प्रभूणां स्वयेच्छयेह[5] स्वहितं चरध्वम् ॥ ८५ ॥

**कृष्णः**—सहदेव ! न युधिष्ठिरो[6] जरासन्ध इव राजद्रोही ।

युधिष्ठिरवशवर्ती परिपालय निजराज्यम् ।

**सहदेवः**—( सविनयं ) भगवन् ! किमपि विज्ञापयामि ।

**कृष्णः**—सहदेव ! उच्यताम्[7] ।

( सहदेवो निजामनुज्ञां भीमसेनाय ददाति । )

---

१. B. य for यस्य । २. B. भमयत । ३. O. omits second निज ।
४. O. –०योगे । ५. O. Lacuna for कलं प्रभूणां स्वयेच्छ ।
६. O. As the folio which begins with ष्ठिरो is having lacuna in many places, its mention is not given hereafter.
७. B. वक्तव्यं for उच्यतां ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**कृष्णः**—भद्र ! इमामादाय शक्रप्रस्थे समागन्तव्यम् ।

( नेपथ्ये मङ्गलगीतध्वनिर्नान्दीवाद्यं च । )

**कृष्णः**—भीम ! अमी सुरगन्धर्वास्तव मङ्गलं कुर्वन्ति ।

**भीमः**—( सानन्दं ) कृष्ण !

अस्माभिस्तव वैभवेन विजिते भूपाकुले भूतले
सम्राडस्तु युधिष्ठिरोऽद्य लभतां तं राजसूयं क्रतुम् ।
प्रेतेशं प्रतिवेशिभिः सह नृपैः प्रीयोऽनुजानात्वसौ
पाण्डुर्ब्रह्मसभां प्रति प्रकुरुतां प्रीतः प्रयाणोद्यमम् ॥ ८६ ॥

अपि च—

अत्यन्तास्खलितानुशासनकृतामाज्ञाकरक्ष्माभृता-
मत्यन्तं मयनिर्मितोत्तमसभाहर्म्येषु रम्यश्रियाम् ।
अद्याऽस्माकमसूयया परिसरन्निःश्वासवातावली-
सम्पुष्टेन सुयोधनः प्रियधनो दुःखाग्निना दह्यताम्[१] ॥ ८७ ॥

**कृष्णः**—भीमसेन !

स्फूर्जत्त्वद्भुजविक्रमेण शमिताशेषोपसर्गोऽधुना
देवेन्द्रो हतभूमिपालनभरो देवैः सुखं क्रीडति ।
भूभारेऽपहृते लघूकृतशिरः शेषे समे शीतले
पल्यङ्के शयितः स्वमेव भगवान् ब्रह्म स्वयं ध्यायति ॥ ८८ ॥

भवतश्च सकलभिमतसिद्धयः सम्पन्नाः । किं ते भूयः [२]प्रियमुपकरोमि ।

**भीमः**—कृष्ण !

मगधनरप्रतिमे निर्जितोऽयं सुखेन
क्षितिपतिकुलमेतत्पालितं त्वत्प्रसादात् ।
मुदमपि सहदेवः सत्वरं प्रापितोऽयं
मम किमु दुरवापं यत्प्रभोः प्रार्थयामि ॥ ८९ ॥

---

१. O. There are many lacunae in this and the following in Ms. O. on folio 11 a and 11 b.  २. O. omits प्रियं ।

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

तथाऽपीदमस्तु—

भूमिः सस्यसमावृताऽस्तु सकलं सस्यं च सम्पद्यता-
मीत्यादिप्रभवं भयं न भवताद्भूमीतले कुत्रचित् ।
रोगः कस्य न चास्तु नः( चनास्तु न ? )प्रतिदिनं भोगोऽस्तु योगोदधे-
रूर्मिश्रेणिभिरूर्मयो मम शर्मं यान्तु प्रसादात्तव ॥ ९० ॥

( इति निष्क्रान्ताः सर्वे । )

प्रथमोऽङ्कः ।

## समाप्तो भीमविक्रमनामा व्यायोगः ॥

कृतिरियं व्यासश्रीमोक्षादित्यस्य ॥

१ ८ ३ ५
शराष्टरामशीतांशौ विक्रमादित्यवत्सरे ।
व्यासेन मोक्षादित्येन व्यायोगोऽयं विनिर्मितः ॥

१. O. ( Acc. No 6877. Oriental Institute ) has the following entry after this :—

सम्भता.............................विक्रमम् ।
लिखापयामास शुभं हरिदत्तो विदग्रणीः ॥ १ ॥

८ ० ५ १
अष्टाकाशशरब्रह्ममिते दिष्टे तु विक्रमात् ।
पञ्चदश्यां शनेर्दिने ॥ २ ॥

श्रीभटसूरजीसू( सु )तजयदेवअवलोकनार्थाय ॥ लेखकपाठकयोः शुभमस्तु ॥ श्रीरस्तु ॥

B. ( Photostat Copy—of Ms. in British Museum ) reads as follows at the end :—

संवत् १४७३ वर्षे साके १३४७ प्रवर्तमाने भाद्रवा शुद्ध १० दशम्यां तिथौ सोमदिने मूलनक्षत्रे धनस्थे चन्द्रे अघे( द्ये )ह वलसाद्यां( ड्यां )महाराजाधिराज-श्री जाईदेवविजयराज्ये अमात्यराजश्रीबारड-जेसापञ्चकुलप्रतिपत्तौ कायस्थन्या( ज्ञा )तीय महं वुलासुत महंकाह्निया अध्ययनार्थं पुस्तिका भीमविक्रम-महानाटकस्य व्यायोगो लिखितः ।

भग्नपृष्ठिकटिग्रीवा( वं )एकदृष्टि अधोमुखम् ।
कष्टेन लिखितं सा( शा )स्त्रं यत्नेन परिपालयेत् ॥ श्री ९ ॥

P. P. Ac. Gunratnasuri M.S.      Jin Gun Aaradhak Trust

श्रीदुर्गेश्वरपण्डितविरचितं

# धर्मोद्धरणं
# नाम
# नाटकम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

॥ श्रीः ॥

श्रीदुर्गेश्वरपण्डितविरचितं

# धर्मोद्धरणं नाम नाटकम् ।

[ प्रथमोऽङ्कः ]

श्रीगणेशाय नमः ॥

कल्याणानि करोतु कोटिश इहोल्लासाय विघ्नच्छिदे
विघ्नेशो भवताच्च मे स भगवान्भालार्धचन्द्राद्दिवा ।
कैलासाचलसुस्तकैरवकुलोद्बोधं च भास्वद्रुचा
तन्वा कोकवियोगशान्तिमकरोत्प्राक्केतनां(नं)यो निशि[1] ॥ १ ॥

करेण कमलं दधन्मधु कपोलकाभ्यां स्रव-
न्दिशः परिसुगन्धयन्मधुलिहः समाकर्षयन् ।
चिरन्त परिभुक्तकोमलसुहृद्यकञ्जान्तरा-
द्वहन्मुदमपारिणीं मधुरगानमेषां पिबन् ॥ २ ॥

नान्द्यन्ते

**सूत्रधारः**[2]—क भो मद्वर्गीणशैलूषाः ! इत आयात ।

**शैलूषाः**—भो अज्ज ! एदे ह्मि । किं कज्जम् ।

[ भो आर्य ! एते स्मः । किं कार्यम् । ]

**सूत्रधारः**—भो भोः । अनेकानेकविधप्रणतनरपतिमणिराजिराजितकरमुकुट-कान्तिकिर्मीरितोत्तेजितासनमण्डलाङ्गणस्य सुबद्धानर्ध्यताम्रनीलैर्णपटपिहिताखर्वकनककक्षाल-ङ्कृतमत्तमातङ्गबृंहितबहुविधतरलतरतुरङ्गहेषितमुखरितराजभवनद्वारस्य घनतरविजयदुन्दुभि-

१. Marginal note:— मांगल्यशंखचकाब्जकोककैरवशंसिनी । पदैर्युता द्वादशभिरष्टभिर्वा पदैर्भवेत् ॥

२. Marginal note:— नर्त्तनीयकथासूत्रं प्रथमं येन सूच्यते । रंगभूमिं समासाद्य सूत्रधारः स उच्यते ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ध्वनिध्वनिताशेषदिक्चक्रोत्तुङ्गोच्छलच्चतुरङ्गसैन्यसारसम्प्रेरणाप्रगल्भस्याभ्यमित्रीणस्य सार्वभौमस्यैतन्नृपतेश्चित्तमनुभवति नाद्य दर्शनेच्छामिति स्पृशति किंवदन्ती मे कर्णजाहम् । ततः सज्जीभवत नेपथ्यग्रहणाय । सफलीकुर्मः कलाकौशल्यं तद्विहितावलोकनप्रवृत्त्या । ( आकाशे कर्णं दत्वा ) भोः ! किं ब्रूथ । अनेकना[ टका ]द्या( द्य )वलोकनसन्तृप्तस्य प्रभोर्दूरदेशादागते त्वयि कथं भविष्यत्यवलोकनप्रवृत्तिः[1] ॥

**सूत्रधारः**—( ससोत्प्रासं सविनयमञ्जलिं बध्द्वा )—भोः ! किमेवमुच्यते । शृणुत ।

उन्मीलन्नवमल्लिकां मधुकरो यो घ्राणसन्तर्पिणीं
गत्वोद्यानमनेकसौरभरसज्ञानाञ्चितो जिघ्रति ।
सद्यस्तां प्रविहाय पङ्कजवनामोदं नभस्वद्बलाद्
दूरादागतमप्यहो न किमसावासेवितुं चेष्टते ॥ ३ ॥

**शैलूषाः**—भो ! अज्ज पठमं ता अप्पेरिदाओ अह्माणं पवुद्ओ ताएहिं कहं हविसद्दि( स्सदि ) पहुसन्तुट्ठी ता पाथयिदव्वो पहुविलो अणप्पसाओ ।

[ ( भो आर्य ! ) प्रथमं तावदप्रेरिता अस्माकं प्रवृत्तयस्ताभिः कथं भविष्यति प्रभुसन्तुष्टिस्तस्मात्प्रार्थयितव्यः प्रभुविलोकनप्रसादः । ]

**सूत्रधारः**—रे शैलूषाः ! शृणुत ।

अत्युत्कृष्टगुणर्द्धिभूषिततनुर्भव्यः पदार्थः सुधा-
वर्षी चेदवलोकनात्सहृदयैः स्वाद्यङ्करश्चेतसा ।
सोऽयं स्यात्स्वयमेव किं परकृतामाकाङ्क्षते प्रेरणा-
माघ्रातुं नवमल्लिकां मधुकरः सद्गन्धलुब्धेन्द्रियः ॥ ४ ॥

**शैलूषाः**—भो अज्ज । सन्तुट्ठस्स पहुणो चेउ को णु खु अणुवादयिसद्दि ( इस्सदि ) ।

---

१. The ms. adds सूत्रधारः after ०प्रवृत्तिः ॥ Possibly somebody's speech is left out here, since सूत्रधारः was speaking before and the new stage-direction would be meaningless otherwise. Besides, the context of what follows also suggests some omission by the scribe.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

( ओ ( भो ) आर्य ! सन्तुष्टस्य प्रभोश्चितं( त्तं ) कः( को नु )खल्वनुवादयिष्यति । )

**सूत्रधारः**—भोः शैलूषाः ! न केवलं प्रभुः सहृदयः प्रभुपार्श्ववर्तिनीयं परिषदपि तादृशी भवति । अस्माकन्तु

ध्रुवकगमकगीत्युद्भेदपारीणदक्षा-
रसरसविषयान्तःप्रस्फुरन्तो भवन्तः ।
इयमपि रसधारासारसङ्ग्राहिचित्ता
परिषदपि नृपोऽप्यस्त्येव सर्वानुकूल्यम् ॥ ५ ॥

**शैलूषाः**—भो ! को णु ख्खु अहिणओ पवुद्दइदव्वो ।

( भोः ! कः( को नु )खल्वभिनयः प्रवर्तयितव्यः । )

**सूत्रधारः**—( स्मरणमभिनीय ) भो ! अस्त्यत्रभवतो **ब्रह्मवंशोद्भवमोढज्ञातीयभट्टधर्मेश्वरस्य कवेः कृतिविषयो धर्मोद्धरणं[१] नाम नाटकम् ।** तदभिनयन्तो वयं सर्वेषां प्रेक्षकाणां चित्तमनुरञ्जयिष्यामः ।

**शैलूषाः**—भद्दं भद्दं । धम्मो अणुरञ्जओ कस्स णो होई( इ ) । ( भद्रं भद्रम् । धर्मोऽनुरञ्जकः कस्य न भवति । )

**सूत्रधारः**—रे शैलूषाः !

तपस्यया देवनमस्यया च शिलोञ्छवृत्त्या गुरुविप्रनत्या ।
तीर्थव्रतानां परिशीलनेन दानेन धर्मः समुपैति वृद्धिम् ॥ ६ ॥

तस्मादेतैः सम्भावितो धर्मः स्वतोऽनुरञ्जकस्तत्रापि दानसम्भावित एव विशेषेण । यतः

दानधर्मस्त्वधर्मस्य कलेश्चापि नियन्तृकः ।
प्रीणाति पुण्डरीकाक्षं किं पुनस्त्वितराञ्जनान् ॥ ७ ॥

( नेपथ्ये )

आः किम् । शैलूष ! मूर्ख ! कथमस्माकं दृढतरसहायानां बहुबलवतां धर्मकृतं नियन्त्रणं निश्चिनोषि ।

१. The original reading is शृंगारभूषणं which is rightly corrected, by a later hand in the margin, as धर्मोद्धरणं. The marginal name in each folio of the text is धर्मो० ना० ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**सूत्रधारः**---भो शैलूषाः ! श्रुतम् ।

मिथ्यावादनृशंसदम्भखलतानास्तिक्यचौरादिभि-
र्व्यूढैः पार्श्वचरैर्जयेत्यनुपदं तोष्टूयमानोऽग्रणीः ।
हस्तेनाश्रितवेत्रकेण पुरतो वाचा जनानामना-
चारो दर्शयते पदक्रममहो भूयः कलिर्लक्ष्यते ॥ ८ ॥

सोऽयमस्मद्वचनादुद्भूतरोषस्तद्वयमितोऽपसर्पामः ।

( इति निष्क्रान्ताः सर्वे । )

( ततः प्रविशति कलिरनाचारश्च । )

**कलिः**—( आः किमित्युच्चैःकारं कथयित्वा । ) रे अनाचार ! श्रुतं दुर्विदग्धस्य विषपुष्पकस्य शैलूषस्य वाक्यं य एष अधर्मस्य ममापि च नियमनं धर्मसकाशात्समाचष्टे ।

**अनाचारः**—भो महाराओ ( भो महाराज ) !

जोवणमदमत्तङ्गो जम्बुअजूहो जहा सी( सिं )हम् ।
जेतुं[1] पलाक्कमेई तहा व्व एसो तुमं धम्मो ॥ ९ ॥

[ यौवनमदमत्ताङ्गो जम्बुकयूथो यथा सिंहम् ।
जेतुं पराक्रमते तथैव एष धर्मस्त्वाम् ॥ ९ ॥ ]

**कलिः**—रे अनाचार ! तथ्यं तथैव प्रतिभाति ।

तथापि, तद्वाक्यजनुषा रोषानलेन दीप्यते मे शरीरमित्याक्षिपन् रोषेण लोहितायति वाजयति ब्रवीति च ।

आः पश्य—

मज्जैत्राङ्कः कलिङ्गेन्धकशकमगधे चोलपण्ड्यत्रिगर्ते
काश्मीराभीरवङ्गद्रविडमरुकुरुप्रान्तपाञ्चालकेषु ।
द्वीपे द्वीपान्तरेपि स्फुरति जलनिधौ कोऽन्यथा कर्तुमीशः
सन्त्येते मत्सहाया उरुभुजबलिनो दम्भनास्तिक्यमुख्याः ॥ १० ॥

अन्यच्च—

---

१. Ms. reads जेतुमपला० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मत्तः शम्भुः पिनाकी त्रसति गिरिगुहामाश्रितश्चक्रपाणि-
वार्धौ निह्नूय गात्रं स्वपिति फणिफणामण्डलाभ्यन्तराले ।
भानुर्युग्यैस्तुरङ्गैर्झटिति मम भयाद्धावमानः प्रयाति
त्वेते जानन्ति वीर्यं मम भुजजनितं वेत्ति नायं बल्लः ॥ ११ ॥

**अनाचारः**—भो महाराओ !

सुदं मए०वं जे धलणी सुकम्म जणुणो दातुपहुणो दाणप्पवाहे हिं ।
धम्मो पुट्ठसरीरो पुणु दुअरजुऔप्पत्तिअ चेक्कीज्जई ॥ १२ ॥

[ भो महाराज !

श्रुतं मयेवं यद्धरणीसुकर्मजन्मनो दातृप्रभोर्दानप्रवाहैः ।
धर्मः पुष्टशरीरः पुनश्च द्वापरयुगोत्पत्तिश्च चेक्रीयते ॥ ]

**कलिः**—ततः

तीक्ष्णस्तद्वाक्यवज्रः श्रवणविवरतश्चूर्णपेषं प्रपेष्टुं
संवृत्तो हृत्प्रदेशं सकलतनुमनु स्वेदयन् रोमहर्षम् ।
सङ्कुर्वन्भ्रूविभङ्गं भुजदलनमथोच्चौष्ठनिर्दंशनञ्च
हन्त्रे कोः( न्तैकं ) पादघातं तदनु च कलये दर्शयामास मोहम् ॥ १३ ॥

**अनाचारः**--( नृपतिं तथाविधं वीक्ष्य नेत्रनासिकं सङ्कुच्य कण्ठं विभुज्य ) भो महा[ रा ]ओ ! एसों अह्माणं पलिपरव्वलोअस्स अप्पमणो रहोत्थि ।

( इति सान्त्वयति )

[ भो महाराज ! एषोऽस्माकं प्रतिपक्षलोकस्यात्ममनोरथोऽस्ति । ]

**कलिः**—( स्वगतम् )

सर्वान्नीनो नु कोऽपि प्रतिगृहमथ यो नाथते सर्वलोका-
न्नातीनोऽपि प्रकर्षं लघुरपि परतः प्राप्य गर्वं विधत्ते ।
सोऽयं पृथ्वीन्द्रपार्श्वाद्वितरणजनितामिष्टपीयूषवृष्टिं
लब्ध्वा किं किं न कर्तुं प्रभवति कुशलो भागधेयं सुराणाम् ॥ १४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अद्यापि—

कक्को( र्को )टकेन फणिना भरतार्जुनाभ्यां
रामर्तुपर्णपृथुभूपतिभिः परीक्षैः ।
राज्ञा नलेन च सुधर्मपरैः स्वनाम्ना
निष्कास्य एव गलहस्ततयाहमेभिः ॥ १५ ॥

अन्यच्च—

परीक्षिता चापि नृपेण देशादुच्चाटितोऽहं समये मदीये ।
संस्थापितो द्वापर एव तत्र प्रसह्य धर्मावनतत्परेण ॥ १६ ॥

तस्मात्तथैव मत्समयेऽपि तादृशस्य राज्ञः प्रभावात्पुनर्द्वापरः समागमिष्यति नूनम् ।

( इति निश्चललोचनमुखं मुहूर्त्तं विचिन्त्य निःश्वसितम् । )

**अनाचारः**—( राजानं चिन्ताविष्टमवलोक्य )

भो महाराओ !

णिच्चललोअणजुअलं दीहो णीसासओ त( तु )मये ।
चेऊ चिन्ताविहुरं पआसअं मं विबोहअई ॥ १७ ॥

[ महाराज !

निश्चललोचनयुगं( गलं ) दीर्घो निश्वासस्तव ।
चेतश्चिन्ताविधुरं प्रकाशकं मां विबोधयति ॥ ]

**राजा**—रे अत्र कौपीनमेतद्वहसि भवति हि मन्त्रयोग्यम् ।

यतः—

यो जङ्गनीत्यरिगणान्मृगराडिवेमा-
न्मन्त्रः परो निगदितो गुरुभार्गवाभ्याम् ।
तस्योत्तमोत्तमतया न कदापि कार्यः
षट्कर्णगामिकतया स हतप्रभावः ॥ १८ ॥

अन्यच्च—

भूभृतां भवति सार्वजनीनं गुप्तमुच्चरितमाढ्यकुलीनैः ।
यत्प्रधानपुरुषैर्बरिभर्ति प्रार्थितद्विषति जैत्रचरित्रम् ॥ १९ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तस्मादान्तर्वैश्मिकं वक्तव्यमस्ति ।

( इत्युत्थाय वेश्माभ्यन्तरं गत्वा )

**कलिः**—( उच्चः ) बहिः कोऽस्त्यत्र भोः !

( प्रविश्य )

**दौवारिकः**—किमाज्ञापयति महाराजः ।

**राजा**—भो आहूयन्तां नास्तिकदम्भ( म्भा )दयः ।

( दौवारिकस्तथा करोति । आगतास्ते सर्वे सप्रणामं यथास्थानं स्थिताः । )

**कलिः**—( स्वागतिकया द्राग्वलितया दृष्ट्या नास्तिकादीनवलोक्य ) भो नास्तिकादयः ! धर्माङ्कुरप्रशमनोपायः सिद्धान्तधियमाश्रयति । यद्यपि युवराजेनाधर्मेण स धर्मो निर्मूलकाषं कषित एव । तथापि, अनेनानाचारेणाकर्णितो नवीनोदन्तो मत्कर्णमासाद्य प्राणान्समूलघातं हन्ति ।

यतः—

यस्य क्षयश्रवणतोऽमृतवृष्टिधारा-
सेकं करोति वपुरेव नवीकरोति ।
प्रस्यन्दयत्यधरमेव तदुच्चवार्त्तां
वक्तुं जने कथमियर्ति तनुं न तापः ॥ २० ॥

तस्मात्सन्तापः प्राणान्स्वार्थं नयति ।

**नास्तिकादयः**—राजन् ! ते शमस्तु प्रशस्तम् । किमिदमलीकं व्यलीकमास्पदीकरोति मनः ।

पश्य—

एते वयं तव तनूरुहमेकमद्भिः
स्नानीयकैरपि बलात्कुटिलीकृतं चेत् ।
दुःखीभवाम इति नाथ मनस्त्वदीयं
दुःखाकुलीकृतमिदं तु सहामहे किम् ॥ २१ ॥

अन्यच्च—

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मध्यह्नतापनिवहस्तरुमूलमुच्चैः
किं वा दुनोति घनपत्रचयोऽस्ति यावत् ।
मूले दृढे भवति पत्रचयो महान्तं
तापं विस(ष)ह्य फलवद्द्रुममातनोति ॥ २२ ॥

तस्मात् स्वामिन् ! भवत्कृपाकटाक्षैः प्रस्फुरत्प्रभावैरस्माभिः सेव्यमानं भवन्तं मा व्याकुलीकरोतु चिन्तावतारः ।

**राजा**—( तद्वचनरसेनाप्यायितोऽप्यसन्तुष्टचित्तः स्वगतम् )

स्थूलीकर्तुं मत्प्रभावं प्रगल्भा यद्यप्येते जाग्रति स्वैः स्वरूपैः ।
नित्यं शत्रुः शङ्कनीयस्तथापि ज्ञातोद्योगः सत्सहायो भवेच्चेत् ॥ २३ ॥

( इति क्षणं विचार्य ) स्वतोऽहमनिश्चितनिकेतनं तं सर्वतः प्रश्नोद्योगेन परिशोधयेयम् । ( प्रकाशम् )

भो नास्तिक ! धर्मः क्वास्ति ?

**नास्तिकः**—भोः !

त्वत्पादाब्जप्रसादान्मम पुरत इहा:(तः) को हरिः को हरो वा
क्वासौ स्वर्गः क्व शक्रः क्व भवति धनदः क्वास्ति धर्मः क्व धाता ।
सौम्येऽप्यक्षिप्रसारे त्रसति सुरगणः को भ्रुवो वक्रिमत्वं
सोढुं शक्तस्त्रिलोक्यां कमपि हि पुरुषं नाथ नालोकयेयम् ॥ २४ ॥

**राजा**—भोः साधु साधु । ( अथ दम्भमवलोक्य राजा ) भो दम्भ ! स विष्यो धर्मः क्वापि दृष्टः ।

**दम्भः**—महाराज !

कृत्वा शुद्धं त्रिपुण्ड्रं क्वचिदपि तिलकं चोर्ध्वरेखं तुलस्या
मालां कण्ठे निधाय क्वचिदपि जटिलस्थूलरुद्राक्षमालः ।
मौनव्रत्यग्निहोत्रिप्रभृति बहुविधं धर्मशास्त्रस्वरूपं
प्राप्तं लक्ष्मीग्रहार्थं हरिरपि विजितः क्वापि धर्मो न दृष्टः ॥ २५ ॥

**राजा**—भोः साधु साधु दम्भ !

( अथ काममवलोक्य )

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भोः काम ! मद्वशीभूतेन त्वया क्वापि धर्मो दृष्टोऽस्ति ?

**कामः**—महाराज !

उन्मत्तोऽहं दृढान्तःकरणमपि हरिं वज्रपाणिं शशाङ्कं
धातारं क्षीणधैर्यं जनमिव कृतवान्को मदग्रे तपस्वी ।
पुत्रीं पत्नीं गुरूणामपि गणयति कः क्वास्ति नीचोत्तमानां
वार्ता राजप्रसादाद्विकसिततनुना नैव दृष्टोऽस्ति धर्मः ॥ २६ ॥

**राजा**—भोः साधु साधु काम !

( अथ राजा क्रोधमवलोक्य )

भोः क्रोध कथ्यतां धर्मः क्व वसति ?

**क्रोधः**—महाराज !

वात्स्येवाहं महोच्चान् श्रुतिनयनजुषोऽप्यन्धयन्सर्वलोका-
न्पूज्यान्निर्भर्त्स्य( र्त्स्य )मानान्पितृगुरुजननीशिष्टलोकान्हितेप्सून् ।
कुर्यां स्नेहं क्षणादुद्भटमपि शिथिलं हन्मि सूनाप्रवेशं
साधून् राजन्मदग्रे वसति पदशिरश्छेदमर्हः क्व धर्मः ॥ २७ ॥

**राजा**—भोः साधु साधु क्रोध !

( अथ लोभमवलोक्य )

भो लोभ ! क्वास्ति धर्मप्रचारः ?

**लोभः**—

राजंल्लालाटिकोऽहं तव तु परमसन्तुष्टचित्तं विधातुं
वित्तेशं पूर्णवि( वी )र्यो हरिमपि किमतो भूतले राज्यहेतोः ।
पित्रादीनां वधार्थं मतिमपि कुरुते पुत्रकाद्याः किमन्य-
त्प्रत्येकं मत्प्रभावः स्फुट इह भगवन्नास्ति धर्मप्रचारः ॥ २८ ॥

**राजा**—भो साधु साधु लोभ !

( अथ मोहमवलोक्य राजा । )

भो मोह त्वया क्वपि धर्मो( र्मः ) श्रुतोऽस्ति ?

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**मोहः**—महाराज !

हेलोत्क्षिप्तसुरेन्द्रबुद्धिनिवहः शक्तः प्रजेशोऽप्यहं
वैचित्यप्रसराय यक्षपतयस्त्वन्ये सुरेन्द्राः सुराः ।
वश्या मे बहवः प्रभो मम पुरस्त्वापूपिकाः के नराः
कस्तत्रास्ति स धर्मनाम न मया स्वप्नेऽपि दृष्टं श्रुतम् ॥ २९ ॥

**राजा**—भोः साधु साधु मोह !

**( अथ मदमवलोक्य राजा )**

भो मद त्वं जानासि क्वास्ति धर्मः ?

**मदः**—

देवत्वत्करुणाकटाक्षनिवहैः संफुल्लमांसोच्चय-
स्त्वेधद्गात्रशिरास्थिसन्धिनिवहस्त्रैलोक्यके मामिनो( कः ) ।
विद्यारूपधनानि यौवनकुले मत्पुष्टयेऽहर्निशं
नो जानामि विधिं हरं हरिमपि प्रत्येमि धर्मं कथम् ॥ ३० ॥

**राजा**—भो साधु साधु मद !

**( अथाहङ्कारमवलोक्य राजा )**

भो अहङ्कार ! त्वया क्वापि धर्मः श्रुतोऽस्ति ?

**अहङ्कारः**—

सेव्यस्त्वं देव यद्यप्यसि तव निकटे नैम्यनाहूत एव
ब्रह्माणं सोऽहमीशं हरिमपि च कथं दृष्टिपान्थी करोमि ।
त्रैलोक्ये कोऽस्ति नित्यं क्षणमपि सदनं यस्य संभूषयेयं
राजस्त्वं धर्मवार्त्तां मम पुरत इमां लज्जसे नो विधातुम् ॥ ३१ ॥

**राजा**—भो साधु साधु ! येन त्वयाहमपि लज्जास्पदं प्रापितः ।

**वैतालिकः**—जयतु जयतु महाराजतरणिसमुद्गमोद्भूतशोभाप्रचारः ।

पश्य—

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सन्ध्याग्निः सन्धिवेलं शुभफलघटितं लग्नमालोक्य कान्ति
कन्यां दत्ते वराय प्रचुरतरगुणालङ्कृतार्काय तस्मात् ।
रक्तो भानुः सुहृष्टः कनकगिरिमुखात्स्वेन हस्तेन लक्ष्मीं
नद्यां वाप्यां सरस्यां वितरति कमलब्राह्मणेभ्यः प्रपूर्णाम् ॥ ३२ ॥

अन्यच्च—

शीघ्रं विप्रोऽरुणोऽग्निं सितशुचिहविषा तारकाभिश्च हुत्वा
त्रैविद्यान्सर्वतन्त्रान्क्रमकसुपदकान्धर्मविद्याङ्गवियान् ।
स्निग्धांश्छात्रान्विहङ्गान्दिशि दिशि पठतः पाठयत्येष विद्यां
वन्यान्भैक्ष्यादनांस्तान् श्रा( श्र )मजनितदृढाभ्यासचित्तान्फलाय ॥ ३३ ॥

**राजा**—रे क एप प्रतिपक्षपक्षस्य इव विद्याहोमदानो( ना )चरणं करोति ।

**नास्तिकादयः**—न हि न हि महाराज ! वैतालिक एष प्रभातं वर्णयति । युक्तिमात्रमेतत् ।

**राजा**—भद्रं भद्रमस्माकं मन्त्रयमाणानां प्रातर्जातं किम् । भवतु तर्हि । गच्छन्तु भवन्तः स्वस्थानसंभावनाय ।

( इति तदनुगृहीता निष्क्रान्ताः सर्वे )

**इति भट्टश्रीधर्मेश्वरसुतदुर्गेश्वरविरचिते धर्मोद्धरणनाम्नि नाटके प्रथमोऽङ्कः ॥**



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## [ द्वितीयोऽङ्कः ]

**राजा**[1]—( प्रातःकृत्यं विधाय तथैवानाचारदर्शितपदक्रमः सभामण्डपमलङ्कृत्या-वमूर्धा प्रतिपक्षस्मरणमभिनाटयित्वाह उ( त्वाहो )चैः ॥ ) कोऽत्यत्र भोः !

( प्रविश्य )

**दौवारिकः**—किमाज्ञापयति महाराजः ।

**राजा**—भो आहूयं( ये )तां मुहूर्तेन क्रोशशतिकं( को ) दुःशीलं( लः ) प्रहरेण योजनशतिकं च( कश्च ) दुर्जयं( यो ) मत्प्रियङ्करावेतौ कर( ल )भारोहिणौ ।

**दौवारिकः**—( एवङ्कारं दर्शयति ) भो महाराज !

शङ्खाच्छं सर्वपुच्छं पृथुलतरवलद्ग्रीववक्रो( क्रा )च्छदंष्ट्रं
व्यक्ताव्यक्तार्धदन्तं पृथुचलदधरं दूरदीर्घोरुजङ्घम् ।
कांस्याभिर्घण्टिकाभिर्घणणितचरणं हैमपल्याणसज्जं
नाथेनाकर्षयन्तौ जविकरभममू सादिनौ पश्य वश्यौ ॥ १ ॥

**राजा**—( करभतोऽवतीर्य सप्रमाणमभिमुखस्थितौ तौ विलोक्याह ) भो दुःशीलदुर्नयौ ! युवां मे न केवलं प्रेष्यौ चिरन्तनौ प्रियतरावपि ।

**दुःशीलदुर्नयौ**—भो महाराज !

त्रैलोक्यवासिजनचित्तमिदं स्वभावा-
द्रात्रिन्दिवं निजतनौ शुभजङ्घपूकम् ।
त्वच्चेतसो रुचिकरस्य विधायिनौ ता-
वावां तव प्रियतरौ न कथं भवावः ॥ २ ॥

अन्यच्च—

पाल्यं वचः प्रभुमुखोद्गतमेव दासैः
शास्ता यतः प्रभुरयं भयहेतुभावः ।
प्रीतिप्रबद्धमनसोस्तव दासयोस्तु
भिन्नोऽस्ति कश्चिदनघः प्रभुसेव्यभावः ॥ ३ ॥

---

१. The ms. reads अथ राजा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**राजा**—भोः

भृत्यार्हकार्येषु न योजनीयः प्रियः प्रियार्हेषु न योग्यतास्य ।
आत्यन्तिकायै गुरुकार्यसिद्ध्यै नियोज्यते भूपतिभिः प्रियस्तु ॥ १४ ॥

तस्मात्प्रियार्हमेव कार्यं समादेष्टुमिच्छामि ।

**दुःशीलः**—एवं तर्हि दासौ नियोगानुग्रहेण संभावनीयौ ।

**राजा**—भो गच्छतां नगनदीजनपदारण्यादिषु गेहानुप्रवेशं धर्मप्रचाराप्रचारौ निश्चित्य निवेदयताम् ।

( अथ दुःशीलदुर्नयौ राजशासनं नीचैःकारं मुखतोऽनुवाद्य शिरसि निधाय च झटिति जविनमुष्ट्रमारुह्य प्रस्थितौ । ततश्च तौ कुरु-कम्बोज-कोशल-केतय-काश्मीर-कलिङ्ग-किरात-कामरूप-मालव-मगध-मरु-शक-चोल-गौड-वङ्गाङ्ग-विदर्भ-पाण्ड्य-पाञ्चाल-हैहय-केरल-महाराष्ट्र-तिलङ्ग-कर्णाट-द्रविड-कुङ्कण-गुर्जर-सौराष्ट्र-कच्छ-वङ्गाल-प्रभृत्येनकशो देशांश्च पर्वतान्द्वीपान्द्वीपान्तराणि चानेकशः क्षेत्राश्रमदेवायतनानि च नयनविषयीकृत्य राजभवनमासाद्य करभतोऽवतीर्य सप्रणामेन चिरोज्झितराजदर्शनेन नेत्रजडिमानं निवारयामासतुः । )

**राजा**—( ससम्भ्रमवलोक्य स्वागतिकया सान्त्वय्य गाढमालिङ्ग्य स्वहस्तेन निकटमासनं दत्त्वोपस्थाप्य[1] । भो दुःशीलदुर्नयौ ! मन्मनोऽपि युवाभ्यां साकं साम्प्रतमेवागतम् ।

यतः—

स्नेहो यन्मनसो निबन्धनमलं चित्तानुरूपे जने
कार्ये वस्तुनि वानुगच्छति मनस्तस्मिन्प्रयाते सति ।
साकं तेन पुनस्तदेति च पुनः प्रीणाति च प्रीतव-
त्यार्त्ते दुःखशतं दधाति तदहो वश्यं महास्नेहिनः ॥ ५ ॥

अपरं च त्वद्दर्शनेनातितरां समुत्पन्नश्चित्तप्रहर्षश्च ।

यतः—

चित्तप्रहर्षजनकं प्रियदर्शनञ्च
पुत्रप्रसूतिरिति सर्वजनानुवादः ।
तत्रापि पुत्रजनुषः प्रियदर्शनस्या-
धिक्यं यतः सुखमुदेति वचोविनोदात् ॥ ६ ॥

1. Ms. adds आह after उपस्थाप्य ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**दुःशीलदुर्नयौ**—भो महाराज ! प्रत्यक्षमेव स्नेहं भवदीये नयने दर्शयतः। यतः—

वक्त्रस्थिते लोचन एव भावं हृत्कन्दराभ्यन्तरसंस्थितं यम् ।
स्फुटं हि सन्दर्शयतोऽप्यलक्ष्यं यथा करस्थो मुकुरः स्ववक्त्रम् ॥ ७ ॥

**राजा**—अलमनेन वचोविस्तरेण । वक्तव्यः साम्प्रतिकस्त्वत्तद्देशोद्भूतविदितनवीनोदन्तः ।

**दुःशीलदुर्नयौ**—महाराज ! इतः प्रयाताभ्यमावाभ्यां सहस्रोत्तरषष्टितमीययोजनान्तराले गगनमध्यावलम्बिनि भास्वति दृष्टः कामात्मजो निरोधः । तेन च भवता यौवराज्याभिषिक्तेनाधर्मेण धर्मवृषभः पादत्रयं छित्त्वा धन्वनो महति कूपे प्लावित इति श्रावितं वचः ।

**राजा**—सुष्ठु सुष्ठु । ततस्ततः ।

**दुःशीलदुर्नयौ**—ततः प्रयाताभ्यामावाभ्यां गगनमध्याद्भास्वति किञ्चिदुत्तीर्णवति वामतः समागच्छन्क्रोधात्मजश्चित्ततिरस्कारो नेत्रविषयीकृतः । तेन च त्वत्तः प्राप्ताधिकारस्फु( रोत्फु )ल्लगात्रस्यालस्यस्यात्मजेनानभ्यासेनोच्छेदितानि वेदशास्त्रपुराणादीनि चेति श्रावितं वचः ।

**राजा**—सुष्ठु सुष्ठु । ( इत्युक्त्वा क्षणं विचार्य । ) भो ! वेदशास्त्ररक्षितारो ब्राह्मणबुद्धिप्रभावाः क्व गताः ।

**दुःशीलदुर्नयौ**—भो ! ब्राह्मणबुद्धिप्रभावास्तु दारिद्र्येणोपहता इत्यपि तन्मुखादेव श्रुतम् ।

**राजा**—सुष्ठु सुष्ठु । ततस्ततः ।

**दुःशीलदुर्नयौ**—ततः सद्य एव लोभस्य कनीयोऽपत्यं कार्पण्यं पुत्रेण प्रार्थनाभङ्गेन सह वेगेन शिरो धुन्वत्समागच्छद्दृष्टम् । तेन च वेदशास्त्रादीनामुच्छेदं श्रुत्वा भयेन विह्वलाङ्गानि पलायितानि यज्ञादिकर्माणि। अथ च निलीना वर्णाश्रमाचाराश्चेति श्रावितं वचः।

**राजा**—सुष्ठु सुष्ठु । ततस्ततः ।

**दुःशीलदुर्नयौ**—ततः प्रयाताभ्यामावाभ्यां तत्परेद्यवि गगनाङ्गणे( ण ) एव कतिपयप्रसृतकिरणे भास्वति शीघ्रं समागच्छन्नुच्चैःशिरा अहङ्कारात्मजः फुल्लनासो निन्दको

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दृष्टः । तेन च भवत्प्रसादात्प्राप्तवैभवस्य मोहात्मजस्याज्ञानस्यनिदेशान्म्लेच्छैः पातितानि देवसदनानि खण्डीकृता आश्मप्रतिमाश्चेति श्रावितं वचः ।

**राजा**—सुष्ठु सुष्ठु । ( इत्युक्त्वा विकसितनयनो हर्षं नाटयति । ) भो ! अहं तु

चित्तौष्ण्यभानुकरतापितसर्वगात्रः
पीयूषवारिधरनिर्झरवाक्यधाराः ।
संसिच्य नूतनतनुः परमाप्तहर्षः
शीतान्तरीयहृदयो हि कृतो युवाभ्याम् ॥ ८ ॥

( इत्युक्त्वा ) भोस्ततस्ततः ।

**दुःशीलदुर्नयौ**—ततः प्रयाताभ्यामावाभ्यां गृहीतजालान्कौटिलिकान्पुरोधायारण्यान्यां सुरापीती क्रोधाङ्गना हिंसा दृष्टा । तया च सर्वत्र प्रवृत्तशासनेनाधर्मेण

करोति भुक्त्यै परदारसेवां द्रव्यापहारञ्च वधं पशूनाम् ।
द्यूतं सुरापानमपूजनञ्च देवद्विजानां व्रतभञ्जनञ्च ॥ ९ ॥

जनेष्वित्याज्ञप्तमिति श्रावितं वचः ।

**राजा**—( विकसितनेत्रः ससम्भ्रमं सोत्कम्पं सपुलकं सस्तम्भं गद्गदस्वरमधर्मं बहुमेने । अथ क्षणं विचार्य ) भो ! धर्मपक्षपातिभिर्देवैः क्व पलायितम् ।

**दुःशीलदुर्नयौ**—भो महाराज ! सकलभूतवर्तिनो देवालयस्था देवाः सङ्घीभूय भो भगवन्नधर्मविप्लवात्त्रायस्व सकलाः प्रजा इति हाहाकारप्रचुरं कोलाहलं( ल )स्वरं कुर्वन्तः क्षीरनिधौ शेषशायिनं भगवन्तमाश्रिताः ।

**राजा**—( सद्य एव ) अनर्थमूलमिदम् । ( इत्युक्त्वा मोहं नाटयित्वा आह ) भोस्ततस्ततः ।

**दुःशीलदुर्नयौ**—ततः स भगवान्तद्वचनमाकर्ण्य शय्योत्थायमनिर्वचनीयदेशे रचितराजधानिना सार्वभौमेन भूपतिना तत्तत्खलमुखमुपमर्द्याधर्मशासनं तूर्णं तिरश्चकार । अन्यच्च । प्रत्यहं कर्णेजपैर्देवैर्भगवति क्रोधमुत्पाद्यान्योप्युद्योगः समारब्धोऽस्ति ।

**( इत्येवमादि वृत्तान्तं राजनि शृण्वत्येव )**

**प्रतिहारः**—भो महाराज !

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रालेयांशुप्रगल्भद्युतिललितवपुः सौम्यनेत्रावपातै-
र्देवानाश्वास्य पश्यन्कुटिलविषमयैर्नेत्रपातैर्विपक्षम् ।
आचारादिष्टवर्मा सुरमुनिनवि( मि )तो वीजितश्चामराभ्यां
दिव्यं छत्रं दधानो नृपतिरनुचरैर्द्वापरो दृश्यतेऽत्र ॥ १० ॥

**कलिः**—( ससम्भ्रमं सभयं ) भो दुःशीलदुर्नयौ ! सांशयिकमिदम् । कुतोऽत्र द्वापरप्रचारः ।

**दुःशीलदुर्नयौ**—भूतलवर्तिभिर्देवैरन्योऽप्युपचारः समारब्धोऽस्तीति यच्छ्रुवितं स एवायमुद्योगः ।

**कलिः**—भो ! गतप्राणो द्वापरः प्रादुर्भूतः ।

**दुःशीलदुर्नयौ**—

भाग्यं भूसु[ र ]सेविनां रिपुगणप्राणप्रहारक्षमो
देवैर्भूतलवर्तिभिर्भगवतः सम्प्रार्थ्यमानोऽभवत् ।
दिक्पालांशविवर्तकान्तिनिकरस्त्वेधत्प्रतापोत्करो
यस्याज्ञा वरिवर्ति भूतलमहाभूपालमूर्धाङ्गणे ॥ ११ ॥

तदीयदानवजदी( दि )व्यमन्त्रप्रभावसम्प्राप्तपुनर्जनुः सः ।
लोकोत्तरं भव्यबलं दधानः प्राप्तः प्रभो ! द्वापरभूप एषः ॥ १२ ॥

( **कलिः**—श्रावं श्रावं तत्प्रभावप्रकर्षं स्मारंस्मारं दुःखमन्तर्बभार ।
दर्शं दर्शं दुर्नयस्यास्यमुच्चैर्लामं लाभं भीतिमुत्थातुमैच्छत् ॥ १३ ॥

बहिः कोलाहलः । कलिर्झटिति सचकितमाकाशे कर्णं दत्त्वा
किं भोः पलायध्वं पलायध्वमिति शृण्वन्नेव,
वैवर्ण्यस्वेदरो[ मो ]द्गमपुलकतनुस्त्रासविच्छिन्नधैर्यो
दिक्कोणान्प्रेक्षमाणः स्खलितवच[ न ]तो भाषमाणः क्व यामः ।
इत्येवं ग्लानिदैन्यप्रमुषितहृदयो दुर्नयस्यैकहस्तं
श्लिष्टानाचारहस्तं द्रुतगति सदसः पश्चिमाध्विं जगाम ॥ १४ ॥ )

( इति तदनु तद्वर्गीया निर्गताः सर्वे )

## इति धर्मोद्धरणनाम्नि नाटके द्वितीयोऽङ्कः ॥ २ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

श्रीः

## अथ प्रस्तावना

( ततः प्रविष्टः पार्श्वचरैर्जयजयेति सपुष्पवृष्टिः स्तूयमानो यथानिर्दिष्टो द्वापरः शुभाचारश्च । )

**द्वापरः**—भोः शुभाचार ! मद्वचनेन लोकानाश्वास्यानुशाधि ।

यथा—

देवान्देवालयस्थान्शुभमनुविधिभिर्देवकाः पूजयन्तु
वेदान्साङ्गांश्च सार्थान्स्वरुचिरतनूनैष्ठिकाः पाठयन्तु ।
यज्ञांस्तृप्यन्तु शास्त्राध्ययनमनघमारम्भयन्तु प्रगल्भं
प्रासा( दा )न्देवतानामथ जलनिलयान्भूतले कारयन्तु ॥ १ ॥

**आचारः**—भोः राजाधिराज ! सर्वं तथैवोपदिश्यते ।

परन्तु—

इमे यज्ञाः सर्वे दधति निगमाधीनतनुतां
द्विजाभ्यासाधीनाः सकलनिगमाः साङ्गरुचिराः ।
मतिः स्वास्थ्याधीना भवति स तु सद्ब्राह्मणकुले
मतिस्वास्थ्ये दानद्रविणकृतदारिद्र्यहननम् ॥ २ ॥

**राजा**—( तद्वचनमाकर्ण्य, उच्चैः ) कोऽस्त्यत्र भोः !

( प्रविश्य )

**दौवारिकः**—किमाज्ञापयति महाराजः ?

**राजा**—भोः दानमाहूयताम् ।

**दौवारिकः**—( तथा कृत्वा नीचैःकारं कथयति । ) भो महाराज ! तव

यशोज्योत्स्ना यस्य त्रिभुवनमिदं श्वेतयति स-
त्सुधाधारावर्षी निजकरनिपातैस्त्रिभुवने ।
कलङ्कासंस्पृष्टो व्रजति निकटं दानहिमगु-
र्येदुद्बद्धग्रीवा द्विजगणचकोराः प्रतिदिशम् ॥ ३ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**राजा**—( तमागच्छन्तं दृष्ट्वा ससम्भ्रममुत्थाय सप्रणयमालिङ्ग्य स्वहस्तदार्शिते(त) आसने( न ) उपस्थाप्याह । ) भो दान !

मन्ये पीयूषकल्पं भवति तव वपुर्येन सञ्जीवितोऽहं
जातोऽन्तर्नूत्नगात्रः पुनरपि धरणीराज्यकार्यक्षमोऽस्मि ।
शक्तोऽहं पापसङ्घं प्रबलतरमहो शुष्कपेषं प्रपेष्टुं
त्वामालिङ्ग्यैव तेजोऽङ्कुरखचिततनुः किं बहु स्तूयसे त्वम् ॥ ४ ॥

**दानम्**—भो महाराज ! नैष मम प्रभावः ।

**राजा**—भो तर्हि कस्य प्रभावोऽयम् ?

**दानम्**—महाराज !

पूर्वं दधिचिशिबिकर्णकरैर्विसृष्टं
ख्यातिं गतं त्रिभुवनेऽस्मि हि केवलं ताम् ।
भाग्योच्चभूपकरफुल्लसरोजस्पृष्टं
शक्तं प्रभो सुखमिदं भवते प्रदातुम् ॥ ५ ॥

अन्यच्च, यः प्रभुर्वितरणसमये

सर्वाङ्गीणसमुच्चरत्पुलकसंस्विद्यद्घनौत्साहसं
फुल्लद्गात्रसमृद्धिरेधितमना यच्छत्कराम्भोरुहा ।
रौप्यौघं बहुहेममौक्तिकमणीन्विप्रस्थमुन्मूलय-
न्दारिद्र्यं विदधाति वित्तविषयां शङ्कां च वित्तेश्वरे ॥ ६ ॥

**राजा**—( सविस्मयम् ) अहो भूयात्स स्वस्तिमान्योस्मान्सर्वानुज्जीवयति ।
( इत्याद्याशीर्वचनमुक्त्वा दानं च बहुगुणयुक्तं मत्वाह ) भोः

नयचञ्चुमहातिसूक्ष्ममार्गे
त्प्र( प्र )सरद्बुद्धितरङ्गरिङ्गणाद्यैः ।
प्रभुशक्तियुतैरमात्यवर्गै-
र्न( र्नृ )पते राज्यपदं विवृद्धिमेति ॥ ७ ॥

इति सर्वप्रत्नेन तस्मात्सकलकार्यक्षा( क्ष )माय तुभ्यं मयामात्यपदं दत्तम् । ( इत्युक्त्वा दानशिरसि महार्घं स्वप्रसादीकृतं रत्नमुप[ न ]ह्यति । अथादिशति च । ) भोः प्रधान त्वया धर्मोद्धरणायोद्योगः कर्तव्यः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यतः—

अन्धङ्करणः सर्वदुःखव्रजस्य स्वाढ्यङ्करणो राज्यलक्ष्मीपदस्य ।
स्थूलङ्करणः स्वप्रभावस्य धर्मो नग्नङ्करणो विद्विषां स्थानकस्य ॥ ८ ॥

तस्माद्धर्ममुद्धृत्य तस्मै मन्त्रिदेशाद्यौवराज्यं दत्वा जैत्रयात्रां विधायाधर्मविप्लवात्पालनीयाः प्रजाः ।

**दानम्**—भोः

दत्ता चेन्नृपते प्रधानपदवी मह्यं यदि स्वेच्छया
जैत्राङ्कं भवदीयमेव सकले द्वीपे समुद्रे नगे ।
अन्यद्वीपधरातलेऽपि विदिशं दिक्प्रान्तशैलान्तरे
कुर्यां चेज्जनुरस्ति मेऽतिविमलाद्दातुः कराम्भोरुहात् ॥ ९ ॥

अन्यच्च—

शीघ्रं सन्नद्धसैन्यं गजरथतुरगोद्घोषितं प्रेरयित्वा
छित्वानाचारमूलं निजकरनिकरैः कर्तयेयं ह्यधर्मम् ।
तं धर्मं सज्जगात्रस्फुरितबहुबलाढ्यं विधायैव तूर्णं
बद्ध्वा कामादिषट्कं तव पदकमलेऽहं नतिं कारयेयम् ॥ १० ॥

( इत्युक्त्वा राजशासनं शिरसि निधाय बहिरागत्य वेत्रधारिणमादिशति ) भो ! राजशासनाज्जैत्री यात्रास्ति । ततः सज्जीकर्तव्यं सैन्यम्[१] ।

**वेत्रधारी**—( तथा कृत्वा, दर्शयति । )

हेषन्ते सज्जवाहाः प्रचुरतरमदा बृंहयन्ते गजेन्द्रा
ध्वानोऽयं दुन्दुभीनां मुखरयति दिशां प्राङ्गणं रिङ्गणैः स्वैः ।
सन्नद्धं शस्त्रसज्जैर्दृढितकटिपटैरायुधीयैश्च वीरैः
सैन्यं पश्य त्वदीयं शुभगमनकृते मङ्गलं यच्छतीव ॥ ११ ॥

दानं उच्चैर्मुखमवलोक्य प्रयाणानुकूलं वेशं विधाय प्रयाणं नाटयति ।

यथा—

पृष्ठे तूणीरयुग्मं शरनिकरभृतं लम्बयित्वा धनुश्च
स्कन्धे कौक्षेयकं सत्त्सरुखचितमुखं वामकक्ष्यां निबध्य ।

१. Ms. adds इति after सैन्यं ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तीक्ष्णां शक्तिं च हस्ते श्रितसितवसनो धारयित्वाथ भव्यं
यानं संश्रित्य तूर्णं विजयधृतमनाः सम्प्रतस्थे जयाय ॥ १२ ॥

ततः—

सकलगुणनिधानो दानरूपः प्रधानो
झटिति शुभचरित्रैः स्वप्रभावैर्वरत्रैः ।
स भयजनकरूपाद्भन्वनस्तस्य कूपा-
ज्जनितभुवनशर्मोद्धारयत्येष धर्मम् ॥ १३ ॥

तस्मिन्समये दानधर्मयोः शिरसि
सुराः प्रसन्नमानसाः सुधान्धसोऽपि धर्मतः ।
प्रवृत्तयज्ञभोजिनः सृजन्ति पुष्पवर्षणम् ॥ १४ ॥

[1]**धर्मः**—( क्षणं नेत्रे निमील्य सुखमनुभूय हर्षोत्फुल्लनयनो दानं ब्रवीति । ) भोः,

अधर्मेणाकृष्य प्रमुषितविभावः प्रथमतो
विलुप्याङ्घ्रिं पश्चाद्भयजनककूपे विनिहितः ।
मदुद्धारस्तस्मात्कृत इह विधात्रेव भवता
चिरं जीव्यात्त्वं त्वज्जनिकरजनो जीवक इतः ॥ १५ ॥

**दानं**—( तदाशिषं शिरसि कृत्वा तमालिङ्ग्य भव्याङ्गं कृत्वा च ।

तं यौवराज्ये विनिधाय धर्म-
मेवंविधं यस्य विभाति कर्म ।
दानं निदेशाद्भवतः सवर्म
रथे समारोहति पूर्णशर्म ॥ १६ ॥

अथ स्वयं सारथीभूय प्रस्थानं नाटयति ।

यथा—

गृहीत्वाथ हस्तेन रश्मिं प्रतोदं
यदा धर्मवाहान् प्रणोनोत्ति दानम् ।
सरीसर्ति यानं सरीस्व( स )र्ति चक्रं
नरीनर्ति केकी चरीकर्ति केकाम् ॥ १७ ॥

---

१. Ms. reads अथ धर्मः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथ युवराजं प्रहर्षयितुं रथवेगं निरूपयति ।

यथा—भोः

याबदूराद्धरणितलतोऽप्यक्षिलक्ष्यीकृतो यः
शाखी पश्चात्स भवति तथा सैंधवाः सञ्चलन्ति ।
तस्माज्जाने गरुडतनुजैः साहचर्यं किमेषा-
माचार्यो वा भवति च मु(म)रुन्मानसं वा जनानाम् ॥ १८ ॥

**धर्मः**—( उच्चैः कर्णं दत्वा ससम्भ्रमम् ) भोः !

मन्दस्वरेण शनकैः शिशवः पठन्ती-
त्येवं श्रुतं सरभसं मरुतः प्रयाणात् ।
विद्यावतां सदनकानि भवन्ति नूनं
तस्मादितः प्रजवि वाहय यानमत्र ॥ १९ ॥

**दानं**—झटिति धर्मप्रदेशितेनैव मार्गेण विद्यावतां सदनानि गत्वा तत्र चिरन्तनस्थं दारिद्र्यं वीक्ष्य संरम्भं नाटयति ।

यथा—

दारिद्र्यं वीक्ष्य दूराद्धरणितलमथोत्प्लुत्य यानाच्च दानं
खड्गं निष्काश्य कोशाद्धरिरिवकरिणं हन्तुमभ्याससाद ।
त्यक्त्वा स्थानं चिरत्नं तदपि सरभसं धावमानं स्वजीवं
रक्षद्दूरं विल(ली) [नं] गिरिगहनगुफामध्यभागान्धकारे ॥ २० ॥

(अथ **दानं** स्वनेत्रविषयाद्दारिद्र्यमस्तगिरिदरीश्रितं वीक्ष्य शनैः शनैर्धवलचामरवीजितेन युवराजेन धर्मेण साकं विद्यावतां सदनानि स्वनिवासेनाङ्गीकृत्य तेषां बुद्धिमाहूय ब्रवीति ।) भो विद्वज्जनबुद्धे !

साङ्गोपाङ्गांश्च वेदान्क्रमपदरुचिरान्सर्वशास्त्राणि दिव्यं
साहित्याब्धिं पुराणादिकमपि सकलं वाङ्मयं त्यक्तनिद्रम् ।
रक्ष त्वं मन्निदेशान्नयनविषयतः प्रेक्षणीयं न चान्य-
त्कालुष्यं मत्प्रभावान(न्न) च तव भवितोद्भूतदारिद्र्यदत्तम् ॥२१॥

**बुद्धिः**—भो महाराज !

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भवन्निदेशात्सकलाश्च विद्याः संरक्षितुं शक्तिमती भवामि ।
नो चेत्कथं ते करुणाकटाक्षा विलासदक्षा रचयन्ति सख्यम् ॥ २२ ॥

अन्यच्च—

विद्वज्जनेषु निशि नैद्रसुखानुभूतिं
प्राप्तेष्वहः पठितपाठमहं विधास्ये ।
जाग्रत्तदिन्द्रियगणे करणीयमन्य-
त्सङ्कुर्वतीत्यपि पुनस्तमहं न हास्ये ॥ २३ ॥

एवं विद्याः स्फुरद्रूपतया रक्षितुं प्रगल्भास्मि । परन्त्वत्रालस्याद्बिभेमि । (इत्युक्ते

श्रुत्वा दानं बुद्धिवाक्यं भयार्तं
दृष्ट्वालस्यं कोपमाप्तं प्रकर्षम् ।
सन्ताड्योच्चैः पादताडं पुनस्त-
ज्जीवग्राहं ग्राहितं स्वोद्यमेन ॥ २४ ॥)

**राजा**—भो वैश्रवण ! तेन न पलायितम् ।

**वैश्रवणः**—आलस्येन कथं शक्यते पलायितुम् ?

(ततः आलस्यं हतं दृष्ट्वानभ्यासेनापि भयेन पलायितम् । इत्थं दानेनालस्ये हते भयेनानभ्यासस्य पलायनं श्रुत्वा चतुर्दशविद्यानां रक्षाविधायिनीं बुद्धिमाश्वास्य च तत्र स्वप्रभावं निधाय युवराजेन साकं रथमारुह्य प्रस्थितम् । ततो रथे कतिपयदूरं गतवत्येव ।)

**धर्मः**—

अहो दान दीनो हविर्गन्धिधूमः
प्रयातोऽत्र यज्ञा वसन्तीति लीनाः ।
क्षणं सूचयित्वा गतो घ्राणरन्ध्रं
समागत्य मे रक्ष रक्षात्र यानम् ॥ २५ ॥

**दानं**—(झटिति रथं संस्तभ्यावतीर्य च धर्मप्रदर्शितेन मार्गेण याज्ञिकसदनानि स्वनिवासेनालङ्कृत्य च यज्ञानाहूय ब्रवीति ।) भो यज्ञाः !

मा भेतव्यं वर्धिता वेदविद्या
जागर्त्यासां रक्षकः शास्त्रसङ्घः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गेहे गेहे ब्राह्मणाः पाठयन्ती-
स्युच्चैर्वोषं मत्प्रभावात्पठन्ति ॥ २६ ॥

**यज्ञाः**—( तद्वाक्यं श्रुत्वा झटित्युत्फुल्लगात्रं हर्षं नाटयन्तो ब्रुवन्ति । ) भोः

दि( दी )ना निलीना अपि रूपहीना
अप्यस्मदीयेषु कलेवरेषु ।
त्वद्वाक्यपीयूषरसायनेन
मांसं प्रवृद्धं किल चर्मपूरम् ॥ २७ ॥

**दानं**—भो यज्ञाः !

अव्याहताः सञ्चरत प्रहृष्टा धरातले मत्कृपयानुसृष्टाः ।
यूयं यदा यास्यथ यत्र यत्र यास्यन्ति वेदा ननु तत्र तत्र ॥ २८ ॥

( इति यज्ञानाज्ञप्य ततो युवराजेन साकं रथमारुह्य प्रस्थितम् । ततो दानं धर्मेण साकं वाराणसीं गत्वा गङ्गास्नानेन प्राचुर्येण पुष्टिं दधतं धर्मं वीक्ष्य गङ्गामुपालभते । )

हृष्टस्तीरालोकतो नीरसङ्गात्पुष्टो धर्मो माति नास्मिन्प्रदेशे ।
कष्टं वाहैर्वाहयिष्ये कथं भो गङ्गे सङ्गे दूषणं भूषणं ते ॥ २९ ॥

( इति गङ्गामुक्त्वा जलान्तर्लीनं विश्वेश्वरं दृष्ट्वा सप्रणामं ब्रूते । ) भो विश्वेश्वर !

विषादप्युत्कृष्टं कलिदवथुकष्टं किमु विभो
निलीनं नीरान्तः सुरसरिति दूनेन भवता ।
विहायेदं नीरं पुनरपि हि तीरं श्रय विभो !
कलिः स्थानाद्भ्रष्टः श्रयति किल नष्टो गिरिगुहाम् ॥ ३० ॥

( एतद्वाक्यश्रवणादेव सहर्षं ससम्भ्रमं सपुलकं पुनः पुनः किमिति किमिति पृच्छन्तं विश्वेश्वरं सकलवृत्तान्तं श्रावयित्वा पुनस्तीर आवाह्य पूजयित्वा नमस्कृत्य च धर्मेण साकं कतिपयपदं गच्छन्नेवासन्तुष्टतया विद्यावतो द्विजानप्यवलोक्य दृष्ट्या सम्भाव्य ब्रवीति । ) भो द्विजाः !

लिप्सा चेन्मत्कृपाया यदि मतिविषयं वाङ्मयं सर्वमेत-
द्रक्षध्वं दीप्यमानं क्वचिदपि मलिनं रज्जुमात्रं न निध्या( शिष्या )त् ।
दारिद्र्यं मत्प्रभावाद्भवदभिमुखतां धास्यते नो कदाचि-
द्बुद्धेः कालुष्यकारि प्रचुरनवनवोन्मेषसञ्चारयित्र्याः ॥ ३१ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एवं ब्राह्मणान्समादिश्य दानमतिशयेन पुष्टगात्रं प्रवृद्धबलं प्रगल्भं युवराजं धर्मं बहुगजयुग्मे रथ आरोहयामास च गृहीताङ्कुशान् शमदमादीन् सारथीन् कृत्वा स्वयं तच्छिरसि धृतच्छत्रं प्रतस्थे।)

**धर्मः**—( उच्चैः श्रुत्वा वदति।) भोः पश्य। कोयं चोरङ्कारमाक्रोशति ?

**दानं**—मुमुक्षुरिव दृश्यते। ( एतद्बुध्या लुण्ठनं विधाय।)

सङ्कुच्य गात्राणि नगान्तराले सन्नद्धशस्त्रा विचलच्छिरस्त्राः।
धावन्ति धूर्तास्तव धर्मदृष्ट्याः पथोऽतिदूरीभवितुं स्मराद्याः॥ ३२॥

ये योगमार्गस्य च पारिपन्थिकाः कथं नियम्या न यमादिभिस्त्वया।
कार्यं तु यः सार्वजनीनमिच्छेत्कार्या कथं तेन द्विषद्गुणो( णे )दया॥ ३३॥

( इति दानवचनं श्रुत्वा )

**धर्मः**--भो शमदमयमनियमाः! भवद्भिर्झटिति गजेभ्य उत्तीर्यानुपदिकैर्भूत्वा स्मरादीन्पृष्ठहस्तं दत्त्वानेयास्ते।

( तत्क्षणमेव ) शमदमादयो ( यः--) ( गजेभ्योऽवतीर्य तथाकारं दर्शयन्ति।) भोः!

दृढं बद्धाः पाशैस्तव चरणदासैर्भुजबला-
दमी त्वां याचन्ते निजवपुरवध्यत्वमखिलम्।
अलं दुष्टाः शिष्टैर्निगमविनिविष्टैर्निगदितं
न हन्तव्या द्वेष्या विदधति च ये दैन्यवचनम्॥ ३४॥

( धर्मः इति श्रुत्वा स्मरादीन् दृढतरयायःशृङ्खलयाइ( र )थ्यपृष्ठ उपनाह्य शमादीन् पुनः सारथित्वे नियोज्य तथैव प्रतस्थे। ततस्तस्मिन्कतिपयाध्वानं गतवत्येव दूरादाक्रन्दन्तीमधर्माक्रान्तामयश्वीनां गां वीक्ष्याक्रन्दिको भूत्वा झटिति कोशात्खड्गं निष्कास्य यावद्धन्तुं प्रचक्रमे तावदेव। अधर्मः

विहाय गां गां समुदीरयन्भयादतीव दीनां तृण( वि न )दन्पलायते।
जवात्स्खलन्सन्निपतच्छिलातले क्षुरःप्रपीडं स दिगन्तमाप्तवान्॥ ३५॥

ततः स धर्मोऽधर्मे नष्टे स्वप्रौढिं नाटयित्वा गजरथमारुह्य प्रस्थितः। ततो धर्मो दूरादवन्तीमालोक्य वदति।)

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**धर्मः**—भो दान !

क्षिप्रं क्षिप्रातीरभूमौ निविष्टा हृष्टा दृष्ट्वा मामथालोक्य दूरात् ।
भूषाभ्रष्टा यद्यपीयं ह्यवन्ती जाता पुष्टामीष्टशोभाभिजुष्टा ॥ ३६ ॥

( इति वदन्निकटं गत्वावन्तीं समाश्लिष्य भिन्नाश्मप्रतिमान् देवालयान्वीक्ष्य भक्तिरसार्द्रचेताः पूर्वाधिकं तान्नवीचकार । तत्रान्धगृहाश्रितं महाकालेश्वरपीठं पुनःस्थापनाय प्रार्थयति । )

प्रभापूर्णं तूर्णं सदनमतिजीर्णोद्धृतमिहा-
श्रयेदं खेदं च त्यज हर महाकालकलितः ।
विहायामुं पाणिन्धमपथि निवासं पुनरमुं
विलासं कुर्वीश प्रचुरसुखपर्याप्तिकमुखः ॥ ३७ ॥

( इति महाकालेश्वरपीठं प्रार्थनापूर्वकमानाय्य पुनः संस्थाप्य च सम्पूज्य नत्वा च प्रस्थितः । इत्थं धर्मः

ग्रामे ग्रामे देवसद्मानि कुर्वन् कुर्वन्प्रासस्त्र्यम्बकं शैलसंस्थम् ।
छित्वा छित्वा यावनं चिह्नमुच्चैरुच्चैर्देवान्स्थापयन्स्थापयन्सः ॥ ३८ ॥

तान्प्रातिकण्ठिकतया सकलान्सुदुष्टा-
न्निष्काश्य तत्र शुचिधार्मिकधामजुष्टान् ।
गा( गो )दाद्रितीरमुनिमित्रपवित्रदेशे
शेषं विलोक्य च जगाम सुरालयेशम् ॥ ३९ ॥

घुश्मे( ? घृष्णे )श्वरं प्रणतिपूर्वमपूर्वमूर्त्तिं
सम्प्रार्थ्य पूजनविधेः स विधाय पूर्तिम् ।
सर्वत्र तत्र सुरमन्दिरपूर्त्तकर्म
कुर्वन्निनाय नयने पृथुसेतुबन्धम् ॥ ४० ॥

नित्वा च रामेश्वरपार्श्वभूमिं कृत्वा सपर्यां बहुसंविधाभिः ।
ततश्चतुर्दिग्विजयं विधाय प्रयाति राजंस्तव सन्निकर्षम् ॥ ४१ ॥

एवं दिग्विजयं नाटयित्वा नृपदर्शनार्थं ससैन्यमागमनं नाटयति ।

नीचैर्वैवधिकाश्चलन्ति विविधैः संभारभारैर्नता
मत्तं हास्तिकमाश्वमुत्तरलकं रथ्यावरूथान्विता ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यान्त्युच्चैश्च पदातयोऽपरिमिता यस्मिञ्जितं राजकं
साङ्गं सैन्यमिदं नयन्नृ [[1]पपुरो दानं सधर्मं गतम् ] ॥ ४२ ॥

नृपः सप्रणाममुपस्थितं दानं धर्मं च वीक्ष्य ससम्भ्रममालिङ्ग्य स्वागतिको भूत्वा तन्मुखाद्दिग्विजयवृत्तान्ते कामक्रोधादीनां यावन्नियमनं शृणोति तावदेव

**वैतालिकः**—जयतु जयतु देव ! गगनमध्यालम्बिभास्करः यः

सर्वाशाक्ष्माभृतामप्युपरि विनिहितुं किं समांशात्करौघं
दिक्चक्रं द्रष्टुकामः किमु रविरधुनाकाशमध्यं प्रयातः ।
दन्तिछायां श्रयन्ते हरिकिरिहरिणा व्याकुला आतपौघैः
केकी पिच्छान्तरालं नयति निजशिरो भूबिलान्तर्भुजङ्गः ॥ ४३ ॥

**राजा**—भोः ! अस्माभिरुपासनीया माध्यन्दिनी सन्ध्या । यतो जातोऽयं मध्याह्नसमयः । अवशिष्टं विधास्यत्यतो धर्मः समागत्य इत्युक्त्वा निष्क्रान्ताः सर्वे ॥

**॥ इति धर्मोद्धरणनाम्नि नाटके तृतीयोऽङ्कः ॥**

---

१. The Ms. has a lacuna here.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## चतुर्थोऽङ्कः ।

अथ—

शमय[म]नियमादिभिः स्वकीयैः सदनुचरैः सहितो हितानुयायी ।
सकलमपि विधाय सान्ध्यकर्म क्षितिपसदः पुनरेति सोऽपि धर्मः ॥ १ ॥

धर्मः नृपतिवत्स्वनिवासेन सभामण्डलं यावदलङ्करोति तावत्

**प्रतिहारः**—भो भो युवराज !

उद्बुद्धाम्बुजलोचनोऽसिततनुर्दीक्षां दधद्वैष्णवी-
मुद्दीप्तो मणिहेमभूषणभरैरापादमामस्तकम् ।
सद्गन्धाम्बरपुष्पचन्दनरसैश्चालम्ब्य दिव्याङ्गना-
मास्ते द्वारमहो विदूषकयुतः कश्चित्पुमान् रूपवान् ॥ २ ॥

**धर्मः**—(तद्वाक्यमाकर्ण्य स्वगतम् ।) अहो कामं निगडबन्धनान्मोचयितुं शृङ्गारः समागतो नूनम् । (प्रकाशम्) भोः प्रावेशयतामेनम् । (प्रतीहारस्तथा कृत्वा दर्शयति) भो युवराज ! तथाविधः प्रणमत्येषः ।

**युवराजः**—(सहर्षमवलोक्य संस्पर्श्य च गाढालिङ्गनेन स्पर्शसुखमनुभूय स्वसमीपमुपस्थाप्याह ।) भोः !

तवालोकाद्धर्षः समजनि मदीये हृदि पर-
स्तथा स्पर्शाद्धर्मो घनपुलकसङ्गश्च वपुषि ।
त्वदाश्लेषात्स्पृष्टा गलितविषया ब्रह्मपदवी
मया सान्द्रानन्दानुभविजनबोधैकहृदया ॥ ३ ॥

इत्येवमुक्त्वा तत्सुखमनुस्मरन्पुनस्तमाश्लेष्टुमुत्थितवन्तं युवराजं नियमोऽभिमुखीभूय भो नैतत् पात्रं पुनराश्लेषस्येति भ्रूसञ्ज्ञया सूचयति । युवराजस्तत्सञ्ज्ञामुपलभ्य स्थितस्तूष्णीम् ।

**शृङ्गारः**—

आनन्दवाहनमनन्तविशालदुःखैः
क्लान्तं जनं सपदि दिव्यसुखोपमग्नम् ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पूर्णं करोमि परिरम्भणतः प्रगाढं
श्लाघ्यं जगत्रयजनैरपरैश्च बाढम् ॥ ४ ॥

परं तु—

चित्तं त्वसन्तुष्टमिदं ममेष्टः कारागृहं ते विवशः प्रविष्टः ।
जीवं ममैवं युवराज ! कामं विमुञ्चतां बन्धनतो निकामम् ॥ ५ ॥

**अञ्जना**—भोः !

अप्पा जस्स स पाओ जो णु दीणां विओजणीं हणई ।
अह पुणु लज्जाहीणो णाह वरं ण खु मोचणं तस्स ॥ ६ ॥

( आत्मा यस्य स पापः यः पुनर्दीनां वियोगिनीं हन्ति ।
अथ पुनर्लज्जाहीनो नाथ वरं न खलु मोचनं तस्य ॥ )

**विदूषकः**—भो अञ्जने सुष्ठु सुष्ठु । सोऽयं तथाविध एव भवति !

**प्रतीहारः**—भो भो शृङ्गार !

भव्यो गौरकलेवरः प्रविकसद्राजीवनेत्राननः-
स्त्वानन्दामृतवर्षिकान्तिनिकरः श्वेताम्बरालङ्कृतः ।
देवेन प्रमथेन संश्रितमहाहृत्कन्दराभ्यन्तरः
कश्चिद्द्वारमलङ्करोति पुरुषस्त्वद्दर्शनाकाङ्क्षितः ॥ ७ ॥

**शृङ्गारः**—( ससम्भ्रमम् ) भो विदूषक ! कुतोऽयमेतस्मिन्समये मत्परं मित्रं हासः । तमेनं प्रावेशय ।

**विदूषकः**—भो अहमेनं ममाङ्गेनालम्बयित्वा प्रावेशयामि । ( इत्युक्त्वा विदूषकस्तथा कृत्वा समागत्य शृङ्गारस्याग्रे हासस्य हस्तं गृहीत्वा भूयो भूयः 'अञ्जना सुष्ठु वदति ।' इत्येवं वदन् कूर्परान्ताभ्यां भुजाभ्यां कुक्ष्यन्तौ पार्श्वदेशौ प्रवादयन् शिरो धुन्वन्नृत्यति । शृङ्गारः हासमवलोक्य प्रोत्फुल्लनयनः सहर्षमुत्थाय हस्ताभ्यां गृहीत्वा गाढमाश्लिष्योपस्थापयति । )

**हासः**—भोः शृङ्गार ! किं वदति विदूषकः ? ।

**शृङ्गारः**—'अप्पा जस्स स पाओ' इत्याद्यञ्जनावाक्यमविमृष्टविधेयांशत्वात्प्रशंसति ।

P. P. Ac. Gunratnasuri M.S.      Jin Gun Aaradhak Trust

**हासः**—( तच्छ्रुत्वा नेत्रे निमील्य स शिरो धुन्वन्नपहस्य वदति । ) भोः !

जानाति नो कार्यरहस्यमुच्चैः श्रुत्वान्यवाक्यं कुरुतेऽनुवादम् ।
चातुर्यगर्वं मनसा विधत्ते मां हासयत्येष विदूषकस्ते ॥ ८ ॥

**शृङ्गारः**—भोः ! एनं तथाविधं दृष्ट्वा यावत्त्वं स्मृतिपथमुपगतस्तावदेव समागतः ।

**हासः**—भोः !

सख्यं सखे नौ तदतीव गाढं यत्सङ्गतं स्यात्स्मृतिकालकेलौ ।
निवासभूमिर्भवतोर्यदा या सावश्यि( श्य )की दर्शनकाङ्क्षिगी मे ॥ ९ ॥

**विदूषकः**—भो हास ! यथा कश्चिदन्धाक्षं हस्तेनालम्बयित्वा स्थलान्तरं प्रापयति, तथा मया भवान्प्रापितोऽमुं प्रदेशम् ॥

**हासः**—( विहस्य ) भोः ! कथं मामन्धोपमानास्पदं करोषि ?

**विदूषकः**—( शिरो धुन्वन् तथैव चेष्टां नाटयन् काक्वर्थेन वदति । ) भोः ! किमलीकमेतत् ? पर्प्येण पङ्गुरिव तथा मदङ्गेन भवानमुं प्रदेशं न प्राप्तः किम् ? ( हासस्तच्छ्रुत्वा शृङ्गारेण सहाट्टशब्दमतिहसति । )

**अङ्गना**—( संस्कृतमाश्रित्य ) भोः !

दिव्याम्बरैश्च मणिमौक्तिकहेमभूषा-
माल्यादिपुष्पनिकरैर्मलयानिलैश्च ।
दूरे सति प्रिययतमे( प्रियतमे )वनिताकुलानां
निर्णाशको भवति नाथ स एष कामः ॥ १० ॥

**शृङ्गारः**—भो हास ! सर्वो लोकः सजातीयपक्षपातीति प्रसिद्धिः प्रामाणिकैव । यैषा मन्मित्रस्यार्थकामस्य निरोधं सजातीयपक्षपातेन श्लाघते ।

**प्रतीहारः**—भो भोस्त्वां

कश्चित्कपोततनुवर्णविराजमानः
कश्चित्स्त्रियः समवलम्ब्य वियोगिनीर्यः ।
हृत्पङ्कजाङ्कय( स )मदुःखसुदीपिताङ्गो
द्वारं पुमान्कलुषनेत्रि दिदृक्षुरास्ते ॥ ११ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**शृङ्गारः**—भोः ! प्रावेशयतामेनम् । ( इत्यादिश्य, हासमवलोक्य ) भो हास ! आगतोऽयं करुणः खलु ।

**हासः**—भोः ! शोच्यमेत्तद्दर्शनं न काङ्क्ष्यत असहिष्णुना मया । ( इत्युक्त्वा निष्क्रान्तः )

( ततः प्रविशति यथानिर्दिष्टः करुणः । )

**करुणः**—

धिद्दैवतं याप्यबला कृशाङ्गी तां संविधत्ते पतिविप्रयुक्ताम् ।
तत्रापि धिग्धिक् पुनरेव कामं दुनोति तां तीक्ष्णशरैर्निकामम् ॥ १२ ॥

( इत्युक्त्वागत्य सप्रणामं शृङ्गारमाश्लिष्य तदालम्बितामङ्गनां समाश्लिष्यति । )

**अङ्गना**—( तदालिङ्गनमनुभूय वियोगिनीं वीक्ष्य वदति । ) भोः !

दीणं दीहतरं विलोअणजुअं थूलं व्व मुत्ताफलं
जासो बाहकणं वमन्दि हिअअं णीसासदो कम्पए ।
हत्थादो वलए गलन्दि अ जहा विज्जूलदाखण्डओ( आ )
एसा कामनिवीडिदा विरहिणी णो जीविदासा जहा ॥ १३ ॥

( दीनं दीर्घतरं विलोचनयुगं स्थूलमिव मुक्ताफलं
यस्या बाष्पकणं वमति हृदयं निःश्वासतः कम्पते [ । ]
हस्ततो वलयानि गलन्ति च तथा विद्युल्ल[ लताख ]ण्डा
एषा कामनिपीडिता विरहिणी नो जीविताशा यथा ॥ )

( तथा भवतीति शेषः )

**शृङ्गारः**—भो अङ्गने ! काम एव मम जीवितं मज्जीविताकाङ्क्षिण्या त्वा(त्वया)न वक्तव्यमेतत् । शृणु

उद्यानं नवमल्लीकाकुसुमसञ्जुष्टं स्फुरच्चन्द्रिका
रात्र्यश्चारुसुधाविलिप्तसदनं शय्या प्रसूनान्विता ।
तैलं चन्दनकाष्ठसारजनितं गीतं च वीणानुगं
चैतस्मिन्स[ ति स ]न्निधौ तव कथं जीवामि कामं विना ॥ १४ ॥

P. P. Ac. Gunratnasuri M.S.     Jin Gun Aaradhak Trust

**करुणः**—भो शृङ्गार ! यद्यप्येवं तथापि मदधिष्ठितेष्वङ्गनाजनेषु दयापरेण भवितव्यम् । पश्येमां **विरहोत्कण्ठिताम्** ।

वाक्यैः कान्तः कटुभिरयमुद्वेजितः किं सखीभी
रुद्धस्तन्व्या पथि किमथवा यान् कयाचित्समेत्य ।
इत्यालोच्य स्मरशरहता वेपमाना कृशाङ्गी
मन्दं मन्दं रुदति च परं पुष्पमालाः क्षिपन्ती ॥ १५ ॥

अन्यच्च, पश्येमां **विप्रलब्धां**

आपादमस्तकमियं च समस्तभूषां
सन्धार्य कान्तपरिरम्भणकाङ्क्षिणीति ।
सङ्केतगेहमतिगम्य च वीक्ष्य शून्यं
शून्या स्थितापि मदनेन शरैर्हतेयम् ॥ १६ ॥

अन्यच्च, पश्येमां **कलहान्तरितां** या,

पादानतं प्रियतमं त्ववधीर्य रोषा-
देकाकिनी स्थितवती रहसि स्मरेण ।
तीक्ष्णैः शरैर्द्रुतविदारितहृत्प्रदेशा-
श्लेषातुरा नु निजकर्म विशोचतीयम् ॥ १७ ॥

अन्यच्च, पश्येमा**मनुशयानां** ।

तापिच्छगुच्छपरिशोभितमध्यभागां
मालां गलेऽपि विनिधाय समागतस्य ।
कान्तस्य दर्शनतयेव शरैः स्मरेण
मूर्च्छान्विता मृदुकलेवरवल्लरीयम् ॥ १८ ॥

**शृङ्गारः**—भोः ! आश्चर्यं त्वमपि दयापात्रं मामनवलोक्याङ्गनामनुसृतः । अहो,

वाचंयमानप्यतिवाञ्छिनो यास्तपस्विनः स्वाभिमतानुकूलान् ।
कुर्वन्ति येनैव स मोहमन्त्रो महानयं वामविलोचनानाम् ॥ १९ ॥

**करुणः**—भो निर्दयचित्तस्य कामस्य समानचित्तत्वेन त्वयैव मामनवलोक्य पक्षपातो विधीयते। भोः किमेवमुच्यते ? (इति रोषावेशशोणलोचनो यावद् ब्रवीति तावत्)

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**प्रतीहारः**---भो !

फुल्लज्जपाकुसुमताम्रकलेवराभो
रुद्राश्रितामलहृदम्बुजमध्यभागः ।
आलम्ब्य रुष्टवनिताकटुवाक्यदीप्तो
द्वारं श्रितोऽस्ति पुरुषो हि समेत्य कश्चित् ॥ २० ॥

**शृङ्गारः**--भो ! प्रावेशयतामेनम् ।

**करुणः**--( स्वगतं । ) आगतोऽयमनार्यो रौद्रः । शृङ्गारोऽपि मद्वाक्यजनितरोषेण तादृशो भवति तस्मान्न स्थेयमनार्यसमाजे ।

( इति विचार्य निष्क्रान्तः । )

( ततः यथानिर्दिष्टो **रौद्रः**--भोः !

कृत्वा किल स्नेहममायिकं प्राक् सार्धं शठा ये भवतीभिरद्राक् ।
विहाय वोऽन्यत्र रमन्ति सारैर्नालोकनीया नयनप्रचारैः ॥ २१ ॥

इति खण्डितादिवनिताः समुपदिशन्प्रविशति । )

**शृङ्गारः**--( दूरादवलोक्य समुत्थाय समाश्लिष्य च स्वयं स्थित्वा स्वसमीपमुपस्थाप्याह । ) भो रौद्र !

निजकरकलितास्ता योषितः प्रोषितानां
नतनयननिपातैर्वीक्ष्यमाणो वदन्सः ।
सविनयमपि तासां पक्षमाश्रित्य वाक्यं
मम हृदयनिहन्त्री कामनिन्दां करोति ॥ २२ ॥

**रौद्रः**--

भ्रूभङ्गोत्कुटिलीकृतास्यमधरं प्रोद्दंश्यदन्तैर्भुजा-
स्फोटं च प्रविधाय सद्भुजबलात्कृत्वायुधोत्क्षेपणम् ।
कोऽसौ क्वास्ति स निन्दति प्रविसरद्यः कामकर्माखिलं
हन्तव्यो निशितायुधेन तरसा सप्राणघातं मया ॥ २३ ॥

( इति वदति । )

**शृङ्गारः**--भो भवदागमनवृत्तान्तश्रवणादेव पलायितं वराकेन तेन । संस्तम्भ्यतामकाण्डाटोपः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**रौद्रः**—( किञ्चिदाटोपं संस्तम्भ्य खण्डितां च समवलोक्य वदति । ) भो शृङ्गार ! पश्येमां **खण्डिताम् ।**

निद्राघूर्णितशोणलोचनयुगं नारीनखैरङ्कितं
प्रातर्वीक्ष्य पतिं गृहागतमियं प्रोद्घाट्य मर्माखिलम् ।
व्यङ्गचैर्वाक्यशरैः प्रतक्ष्यति तनुं तस्य क्रुधा तत्र भो
कामं निन्दति कास्पदीकृततनुर्याया मया साम्प्रतम् ॥ २४ ॥

अन्यच्च, पश्येमां **मानिनीम् ।**

कुर्वन्तं सविलासहासकुतुकं सार्धं युवत्यान्यया
कान्तं वीक्ष्य निजं सरोषनयना वक्रीकृतभ्रूलता ।
तत्कालं मुखमुद्रणां कृतवती पृष्ठं ददाना सती
चित्ते निन्दति कान्तदुश्चरितकं सैषा न कामं पुनः ॥ २५ ॥

**शृङ्गारः**—रौद्र !

लोके चिरादाप्तवियोगदुःखाद्गूना जनाः कं परिदूषयन्ति ।
वामा जना[ ए ]व वियोगदुःखात्कामं प्रकामं हि कलङ्कयन्ति ॥ २६ ॥

मम तु काम एव सुखस्याहर्ता । तदलीकनिन्दको न रोचते मह्यम् ।

यतः—

बला( लि )नामपि बलदः सुखदः सेव्यः समस्तलोकानाम् ।
आनन्दामृतवर्षी नयननिपातेन दम्पत्योः ॥ २७ ॥

अन्यच्च—

जगज्जैत्रधनुर्धारी बलं दत्त्वा स्वकं पुनः ।
सोऽभिसारयते कान्तां जेतुं सुरतसङ्गरम् ॥ २८ ॥

[ ततः प्रविशति प्रतीहारः ]

**प्रतीहारः**—भोः !

कनकरुचिरकान्तिर्जैत्रशाली( लि )प्रभावः
स्फुरति हृदयपद्मे यस्य चन्द्रात्मभावः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अभिसरणविधात्रीश्चावलम्ब्यैव कान्ता-

स्तव हि सपदि कश्चित्पूरुषो द्वारमास्ते ॥ २९ ॥

**शृङ्गारः—**भोः ! प्रावेशयतामेनम् ( इत्युक्त्वा रौद्रं प्रवदति । ) भो रौद्र ! आगतोऽयं वीरः खलु ।

**रौद्रः—**भोः ! यद्यपि मम चि( मि )त्रं भवति, तथापि मया गम्यते कार्यान्तरकरणीयाय । भवानेव तेन वार्तासुखमनुभवतु । ( इत्युक्त्वा निष्क्रान्तः । )

( ततः प्रविशति यथा निर्दिष्टो वीरः । )

**शृङ्गारः—**( वीरं वीक्ष्य सोत्साहमुत्थाय समाश्लिष्य स्वसमीममुपस्थाप्य चाह । ) भो वीर !

समागतस्यापि च काममुक्त्यै व्यग्रीकृतं मे करुणेन चित्तम् ।

आश्वासितं रौद्ररसेन तूर्णमुत्साहितं त्वच्छुभदर्शनेन ॥ ३० ॥

**वीरः—**अथ किम् । भोः !

तूष्णीकमित्रं मम कामदेवो भवांश्च वृत्ते सुरतप्रसङ्गे ।

अस्मत्त्रयाणां हि समागमेषु सुधाघनो वर्षति पीनधाराम् ॥ ३१ ॥

अन्यच्च, पश्येमामस्मत्त्रयाधिष्ठिताम**भिसारिकाम्** ।

येयं—

पादाविष्टसमस्तमत्तकगजासद्भ्रूधनुर्मञ्जरी

तीक्ष्णोदग्रकटाक्षबाणनिवहा हास्यास्त्रसङ्गान्विता ।

गच्छन्ती भुजपाशभूषिततनुर्जानाति तृण्यां जग-

त्सोत्साहा रतसङ्गरं रचयितुं काते( न्ते )न केलिग्रहे ॥ ३२ ॥

अन्यच्च, पश्येमां **ज्योत्स्नाभिसारिकाम्** ।

सच्चन्द्रान्वितघृष्टचन्दनतनुत्राणं निधायायतं

सर्वाङ्गीणसितप्रभू( सू )नरचिताभूषायुधैः सज्जिता ।

उद्दिश्य प्रियसङ्गतौ रतरणं कर्तुं प्रगल्भोत्सवा

चञ्चच्चन्द्रकरावलम्बितपटा पीनस्तनी गच्छति ॥ ३३ ॥

अन्यच्च, पश्येमां **कृष्णाभिसारिकाम्** ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मृगमदपरिलेपायस्तनुत्राणमादौ
तदुपरि पृथुशाटीश्यामसन्नाहमन्यत् ।
रतरणजयकामा कामिनी सन्दधाना
व्रजति दयितगेहं दृष्टिबाणान्क्षिपन्ती ॥ ३४ ॥

परन्त्वस्मासु त्रिष्वपि सर्वासामभिसारे काम एव महन्मूलम् ।

यतः—

या या पिनद्धचिरकालिकवाक्कपाटा
कान्ते निजाघटितनेत्रयुगप्रचारा ।
तां तां कटाक्षचतुरां बहुवाक्प्रपञ्चां
कामः करोति किल मुग्धवधुं( धूं ) प्रगल्भाम् ॥ ३५ ॥

[ ततः प्रविशति प्रतीहारः ]

**प्रतीहारः—**

हृ[ द ]यकमलकोशध्यातकालात्मरूपः
शिथिलसकलमूर्तिः शूकरः श्यामरूपः ।
भवति निजकरेणालम्ब्य मुग्धाः स्त्रियस्ता-
श्चकितनयनपातः पूरुषो द्वारयातः ॥ ३६ ॥

**शृङ्गारः—**भोः ! प्रावेशयतामेनम् ।

**वीरः—**भो ! आगतः प्रतिपक्षो भयानको( कः । )नूनं न विरोद्धव्यमार्याणां सदसि । इतो गमनमेव वरम् ।

( इति क्षणं विचार्य निष्क्रान्तः । )

( ततः प्रविशति यथानिर्दिष्टो भयानकः । )

शृङ्गारः सप्रणाममुपस्थितं तं समाश्लिष्य स्थितस्तूष्णीम् । )

**भयानकः—**भोः ! भवानुन्मना इव मां प्रतिभाति ।

**शृङ्गारः—**भोः ! मत्परं मित्रं वीरो 'या या पिनद्धे' त्यादिकामप्रशंसां कुर्वन्त्वामागतं श्रुत्वेदानीमेव प्रस्थितः । तच्चिन्तया विकृतिरियम् ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**भयानकः**—भोः ! भवान्मत्प्रसङ्गेनैव मित्रसुखमनुभवतु । यद्यपि कामो वीरश्च बलिनौ; तथापि मद्दर्शनात्पलायेते । अथ च, यावन्न मम पादप्रसारस्तावदेव मुग्धवधूषु कामकृतं प्रगल्भत्वमपि । यतः पश्येमामजातरजसं पतिगृहीतहस्तां **मुग्धवधूम्** ।

यथा—

शिक्षाभिर्बहुशः सखीभिरनिशं कन्दर्पदर्पीकृता
भूषाभिश्च विभूषिता नववधूः केलीगृहं प्रापिता ।
कान्ते स्पृष्टकरे पलायितुमनाः स्विन्ना नता कम्पिता
त्रस्ता गद्गदवाक्चिता पुलकिता भ्रान्ता च सम्मोहिता ॥ ३७ ॥

अन्यच्च—

कराभ्यामाक्रान्ता झटिति मृदुला केलिसदने
नवोढा वोढारं वदति न हि ना नेति विवशा ।
विवर्णा विश्रान्ता दिशि दिशि कुरङ्गीव चकिता
सवेगोत्प्रेक्षाणा पुलकरचिता घर्मनिचिता ॥ ३८ ॥

अन्यच्च—

शिक्षावाक्यैः सखीनां प्रथममतनुभिर्भङ्गुरागर्वभारै-
र्लीलागेहं प्रविष्टा धृतमृदुचरणा साहसात्स्वामितल्पे ।
किकि(त्कि)त्कर्तुं(र्तुं)प्रवृत्ते सति निजतरुणे तत्क्षणं त्यक्तगर्वा
त्रासग्लान्यौघदैन्यभ्रमभरनमिता त्यक्ततल्पा नवोढा ॥ ३९ ॥

तस्माद् भोः !

चपलं मुग्धाहृदयं नियतश[र]व्यं स्मरस्य न शराणाम् ।
तत्र शरे परिमुक्ते कामोऽप्यपहस्ततां याति ॥ ४० ॥

**शृङ्गारः**—भोः ! वराकानां बालानां हृदये न हि शिष्टस्य तरुणहृदययोग्यो बाणप्रहारः समुचितः ।

**भयानकः**—( सक्रोधम् । ) भोः ! कुत्रास्ति कामस्य शिष्टत्वम् । निन्द्येष्वपि भवति प्रवृत्तिः खलु तस्य ।

**प्रतीहारः**—[ प्रविश्य ] भोः !

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

कृष्णक्षपानीलकलेवराभो भास्वन्महाकालसुदेवताढ्यः ।
आलम्ब्य नारीश्च रजस्वलायाः कश्चित्पुमान्द्वारमिहाधुनास्ते ॥ ४१ ॥

**शृङ्गारः**—(स्वगतम् ।) आगतोऽयं बीभत्सः खलु । (प्रकाशम्) भोः ! प्रावेशयतामेनम् ।

**भयानकः**—(स्वगतम्) अयमपि कामस्य शिष्टत्वं प्रकाशयिष्यति । किमर्थं मयार्यस्याग्रे स्थित्वोक्तिप्रत्युक्तितया वैमनस्यं कर्तव्यम् ।

(इति विचार्य निष्क्रान्तः ।)

(ततः प्रविशति यथानिर्दिष्टो बीभत्सः ।)

**[शृङ्गारः—]**

(विस्राविरक्ताङ्कवराङ्गदेशा श्लथस्तनी रूक्षविमुक्तकेशा ।
रताशया मामवलम्बतेव कामस्य कीदृक्कलना किलेयम् ॥ ४२ ॥

इति वदन्तं सप्रणाममुपस्थितं बीभत्सं समाश्लिष्य सोत्कम्पनेत्रनासिकं सङ्कुच्य पुनः पुनस्थूत्कृत्वा निष्ठीवयन् वदति ।) भो बीभत्स ! सर्वत्राविशेषेण जगत्सुखप्रदस्य कामस्य साधारणी प्रवृत्तिः खलु ।

यतः—

कामस्य चन्द्रस्य ततोऽस्ति सख्यं नीचेऽप्यनीचेऽपि समानचित्तम् ।
यत्रैव चन्द्रस्य कराः स्फुरन्ति तत्रैव कामप्रसरा भवन्ति ॥ ४३ ॥

**विदूषकः**—भोः ! कामकलानिध्योः कुत्रापि न भवति साधारणी प्रवृत्तिः समानशीलत्वं च । पश्य,

जगन्मनः(न्मनः)क्षोभकरश्च कामः शशी जनाह्लादकरोऽभिरामः ।
विषस्य पीयूषरसस्य पानं चाहो कथङ्कारमिदं समानम् ॥ ४४ ॥

(इति वदन्तं तं शृङ्गारो विहस्य भ्रूसञ्ज्ञया निवारयति ।)

**बीभत्सः**—भो ! आवयोस्तु भवति साङ्गतिकं सख्यम् । परं तु पश्यास्यां मदधिष्ठितायामङ्गनायां प्रा(का)मप्राबल्यम् ।

दुर्गन्धाम्बरधारिणी सुमलिना कृष्णा च शुष्कस्तनी
पीताक्षी च सपीनसा पृथुशिरा लम्बोष्ठदन्ताङ्घ्रिका ।

P. P. Ac. Gunratnasuri M.S.    Jin Gun Aaradhak Trust

दुःश्रव्यस्वरभाषिणी सुकुटिला सर्वाङ्गरोमान्विता
नारी चार्तवरक्तसङ्गिवसना मां कामतः श्लिष्यति ॥ ४५ ॥

इत्युक्त्वा सजुगुप्सं स्वयङ्ग्रहाश्लेषमनुभूय वदति ।) भोः

कामः प्रकाशं भवतो हि मित्रं यद्यप्ययं सर्वसमानचेताः ।
मह्यं तु(वि)निन्द्यापि ददाति नारी यतः स्वयङ्ग्राहसुखानुषङ्गम् ॥ ४६ ॥

**प्रतीहारः**[ प्रविश्य ]—भो भोः !

फुल्लचम्पकपुष्पपिङ्गलतनुर्भव्यो महाविस्मय-
श्चित्ते मन्मथचातुरीं सुरुचिरां सञ्चिन्त्यमानो मुहुः ।
हृष्टो मन्मथदैवतः सुरुचिरास्तारुण्यवर्णाः स्त्रि[ य-]
श्चालम्ब्यैवमलङ्करोति तरुणो द्वारं हि कश्चित्पुमान् ॥ ४७ ॥

**शृङ्गारः**—भोः ! प्रवेशयतामेनम् ।

**बीभत्सः**—( स्वगतम् ) आगतोयमार्योऽद्भुतः । शृङ्गारस्तु मां विहायैनं समाश्लिष्य च गोष्ठीसुखमनुभविष्यतीति न स्थेयमकिञ्चित्करेण तदुद्वेजकेन मया ।

( इति विचार्य निष्क्रान्तः । )

( ततो यथानिर्दिष्टोऽद्भुतः )

' आश्चर्यमाश्चर्यमहो स्मरेण प्रसूनबाणैः किल पञ्चभिस्तैः ।
धैर्यं महाधीरमुनीश्वराणामपि प्रमृष्टं प्रथितं पृथिव्याम् ' ॥ ४८ ॥

( इति वदन्प्रविशति । )

**शृङ्गारः**—( तमागच्छन्तं दृष्ट्वा सविस्मयमुत्थाय समाश्लिष्य च स्वसमीपमुपवेशयित्वा चाह । ) भोः !

कन्दर्पकर्मस्तवनाद्दृतानि स्फुटं तवैतद्वचनामृतानि ।
विधाय कर्णेन तनोः प्रवेशं कुर्वन्ति मे तर्पणमिन्द्रियाणाम् ॥ ४९ ॥

**विस्मयः**—भोः !

सेव्योऽस्ति कामस्तु जगज्जनानां तथापि मे सेव्यतमः स देवः ।
ध्यायामि तद्रूपमहर्निशं भो संस्तौमि तस्यैव यशोऽवदातम् ॥ ५० ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अन्यच्च, पश्येदमा( मपि ) सुमहाश्चर्यं कामचरितम् ।

खेता( टा )[1]लम्बनको विराजति महागम्भीरकूपस्ततः

किञ्चिद्दूरमहोऽस्ति पर्वतयुगं तस्माच्छुभः कम्बुकः ।

सोऽयं गायति कामदेवचरितं सप्तस्वरापूरितं

लोका येन विभाविताश्च सकला ध्यायन्ति चेतोभुवम् ॥ ५१ ॥

अन्यच्च—

कम्बौ पूर्णकलानिधिः सुरुचिरो निर्लञ्छनो राजते

तस्मिन्खञ्जनयुग्ममञ्चतितरां बाणाः सुतीक्ष्णास्ततः ।

आश्चर्यं किल निःसरन्ति तरुणास्तैर्वेधिताः सर्वतो

दुःखार्ता बहवः स्तुवन्ति चरितं चेतोभुवः शान्तये ॥ ५२ ॥

अन्यच्च—

तारुण्येन महेन्द्रजालरचनादक्षेण बालातनौ

कन्दर्पस्य मनःप्रहर्षजनकः क्रीडाकलाडम्बरः ।

आरब्धः कटिनामधेयनितरांशून्यप्रदेशात्पुरः

कूपः शैलयुगं कलानिधिरतो गाढान्धकारोच्चयः ॥ ५३ ॥

**शृङ्गारः**—अथ किं, भोः ! ससुरासुरं त्रिभुवनमपि प्रथितप्रभावस्य कामस्य सेवापरं भवति । तत्रापि त्वं तु विशेषतस्तत्परिचर्यापरो भवसि तस्माद्धर्मकाराम( गृ )हे नियमादिभिर्निक्षिप्तस्य तस्य विमोचनार्थमागतस्य मम सहायभूतेन भवितव्यं त्वयेति ।

**प्रतीहारः**—[ प्रविश्य ] भोः !

श्रीनारायणदैवतः सुरुचिरः पूर्णेन्दुगौरच्छविः

सर्वांशोत्तमशीलवान्सुनयनश्चालम्ब्य हस्तेन ताः ।

भव्याङ्गाः पतिदेवता गुणवतीर्भक्त्या च काश्चित्स्त्रिय-

स्तासां बन्धुरिव स्थितोऽस्ति पुरुषो द्वारं विवेकाञ्चितः ॥ ५४ ॥

**शृङ्गारः**—भोः ! प्रावेशयतामेनम् ।

---

१. Since the author seems to hail from Gujarat, has he inadvertantly used the Guj. word खेत in the sense of a field ?

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**अद्भुतः**—भोः ! आगतः खलु शान्तः । अयमेव सकलजनेषु समचित्तत्वाद्धर्मवशात्कामं मोचयितुं भवतः सहायतां विधास्यति । अथ धर्मोऽप्येतद्वाक्यं नोल्लङ्घयिष्यति । तस्माद्गम्यते मया कार्यान्तरकरणाय ।

(इत्युक्त्वा निष्क्रान्तः ।)

(ततो यथानिर्दिष्टः शान्तः "भोः !

जगदखिलमनित्यं स्वप्नवत्तत्र रम्यं
निजपतिपरिचर्याशीलनं चास्ति नित्यम् ।
धरणितलगतानां क्षेत्रतीर्थव्रतानां
फलमिह पतिदेवासेवनाच्छुद्धभावैः" ॥ ५५ ॥

इति पतिव्रताः संश्रावयन्प्रविशति ।)

**शृङ्गारः**—(तमागच्छन्तं दृष्ट्वा सविनयशान्ति समुत्थाय समाश्लिष्य च स्वसमीपमुपस्थाप्याह ।) भोः !

कृताद्भुतेनाद्य यथा प्रशंसा तथा शुभैवा[ स्तित ]वाकृतीयम् ।
उत्थापयत्येतदपि त्वदीयं सन्दर्शनं मां स्मरमुक्तियुक्त्यै ॥ ५६ ॥

**शान्तः**—(स्वगतम् ।) स्म[ र ]मुक्त्युच्चारेणानुमीयते स्मरोऽत्र केनचिन्निबद्धो भवतीति । (प्रकाशम् ।) भोः !

स्मरः कथं केन जगज्जनानां सेव्यो निबद्धोऽस्ति कुतोऽपरा[ धा ]त् ।

**शृङ्गारः**—

मुक्त्युत्सुकानां मतिचोरकत्वाद्बद्धोऽस्ति धर्मेण यमादिभिः सः ॥ ५७ ॥

**शान्तः**—भोः ! अलमतिवचोविस्तरेण । इदानीमेव मत्सहायेन त्वया तन्मोचनाय प्रार्थनीयो धर्मः ।

**शृङ्गारः**—बाढम् । (इत्युक्त्वा यावच्छान्तं पुरस्कृत्य धर्माभ्यर्णं गच्छति तावद्धर्मः सविनयमुत्थाय सशान्तं शृङ्गारं समाश्लिष्य स्वसमीपमुपस्थापयति ।)

**शृङ्गारः**—भो युवराज !

कामादृते न भविता चतुवर्गफलं नृणाम् ।
चतुर्वर्गे यतः कामो गणितोऽस्ति स्वयम्भुवा ॥ ५८ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तस्माद्भवान्कामं निगडबन्धनाद्विमुच्य जनेषु चतुर्वर्गप्रसारं कुरु ।

**धर्मः**—भोः ! नैवंविधः कामश्चतुर्वर्गे परिगण्यते । यद्ययं मदासक्तमनाश्चेत्तदैव चतुर्वर्गेऽप्येतस्य परिगणनां कारयामि । अयं तु केवलं मद्विरोधक एव कथं बन्धनान्मोचनीयो मया ?

**शृङ्गारः**—

कलावधर्मेण भवान्निपीडितो यदा तदा जीवनहेतवे तु तत् ।
समाश्रितोऽयं युवराज तन्मनः प्रहर्षकं कर्म कृतं तदानीम् ॥ ५९ ॥

राज्यं त्विदानीं भवदीयमेतद्धरातलेऽस्मिन्सकले प्रवृत्तम् ।
तादृङ्नमस्यां हि पुनर्विधाता पुनः सखा ते भवितायमेव ॥ ६० ॥

**शान्तः**—भो युवराज ! यदनेनोच्यते तत्तथैव परिदृश्यते । यतः पश्यासु मदधिष्ठितासु पतिदेवतासु भवद्वशीभूतस्य कामस्याचरणम् ।

वाणी माधुर्यमस्याः कलयति विशदं कान्तकर्णोऽधरोष्ठो
हास्यं वासस्य भूमिर्गतिमतिचतुरां मार्दवं शुद्धशाटी ।
कोपं चित्तं कटाक्षान्कलयति न वनप्राङ्गणं हावभावा-
न्भत्तु(र्तु)श्चित्तं तदेनामयमिह मदनो धर्मतः सेवतेऽद्धा ॥ ६१ ॥

अन्यच्च—

शीलेन सीता द्रुपदात्मजा च गौरी समाक्रान्तगुणाऽनयापि ।
प्रशंसतेऽत्यन्तमथापि कामः समीक्षते भर्तृसमीपमेनाम् ॥ ६२ ॥

अन्यच्च—

लज्जावतारां गुरवः सदैनां जानन्ति नीतिं निपुणां स्वसंख्यः ।
स्मा(स्वा)मी विलासासनिकां मनोभूर्नियन्त्रिकां पुण्यकलाममर्थः ॥ ६३ ॥

तस्माद्भवदनुकूलमित्रं कामः परिमोचनीयः । अथ दोषस्तु तस्मिन्संसर्गवशात् । पश्य—

मायावशाद् ब्रह्मणि वैकृतानि यथा नृणां भां(भान्ति) विशुद्धरूपे ।
उपाधिभेदाच्च यथात्मभेदस्तथैव कामः प्रतिभाति दुष्टः ॥ ६४ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**धर्मः**—( तद्वचनं श्रुत्वा " तथ्यमेतद्भवान् शान्तोऽपि तथैवानुवदति " इति मनसि निश्चित्य नियममादिशति । ) भो नियम ! कामं काराग्र( गृ )हान्निष्कास्यायःशृङ्खलां भङ्क्त्वा स्नातानुलिप्तं मुक्तालङ्कृतं विधाय झटिति समान( नी )यताम् ।

**नियमः**—( तथा कृत्वा दर्शयति । ) भो युवराज ! तथाविधः प्रणमत्येषः ।

( युवराजस्तं दृष्ट्वा सप्रीति समुत्थाय समाश्लिषति । अथ च कामोऽपि तं समाश्लिष्य शान्तं शृङ्गारं च गाढमाश्लिषति । तत उपविष्टाः सर्वे । )

**धर्मः**— भोः ।

जगज्जनानन्दकरो मया त्वं दोषान्वृथाशङ्क्य निपीडितोऽपि ।
नौ पूर्वसख्यं न तथापि हेयं गाढं त्वया तच्च पुनर्विधेयम् ॥ ६५ ॥

**कामः**—भो युवराज !

धर्मो नियन्तास्ति जगज्जनानां स कोऽस्ति तस्मिन्निदधाति दोषम् ।
लोकेषु यो धर्मपराङ्मुखः स्यात्तस्मिन्स विष्णुर्विदधाति रोषम् ॥ ६६ ॥

तस्मादावयोर्गाढं सख्यं न स्वप्नेऽपि शिथिलीकरोमि ।

**धर्मः**—( तद्वाक्यं श्रुत्वा प्रसन्नीभूय ) भोः ! मया त्वं चतुर्वर्गे मत्तुल्यतया परिगणितः । ( इत्युक्त्वा कामस्य शिरसि स्वं महार्घं रत्नमुपनह्यति । )

**प्रतीहारः**—[ प्रविश्य ] भो युवराज !

सच्छास्त्रजज्ञानमतल्लिका या शिरोऽङ्गुलीचालनचञ्चुका या ।
सूक्ष्मं पदार्थं परिचिन्तयन्ती द्वारं स्थिता पण्डितमण्डली सा ॥ ६७ ॥

**धर्मः**—भोः प्रावेशयतामेनाम् ।

( शृङ्गारादयः 'न स्थेयं पण्डितानां समाज' इति विचार्य धर्मं प्रणम्य निष्क्रान्ताः सर्वे । )

**॥ इति धर्मोद्धरणनाम्नि नाटके चतुर्थोऽङ्कः ॥**

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

॥ श्रीः ॥

## प्रस्तावना ।

( ततः प्रविशति तथाविधा पण्डितमण्डली । )

**धर्मः**—( प्रत्येकं मण्डलीस्थान्सर्वान्पण्डितताना( न )भिवाद्य समाश्लिष्य च ब्रवीति । ) भो भूमिदेवाः !

सर्वाणि शास्त्राणि सदैवतानि तद्युक्तियुक्तान्यपि जाग्रतीति ।
युष्मासु भव्या भुवि पूजनीया यूयं किलास्माभिरतन्द्रितैस्ते ॥ १ ॥

अन्यच्च—

राजा धरामण्डलसंस्थितोऽपि भवन्मयैर्दिव्यविलोचनैश्च ।
पश्यत्यजस्रं भुवनत्रयस्थं परोक्षमप्यात्मसमक्षतुल्यम् ॥ २ ॥

**नियमः**—भो भो युवराज ! अभ्युत्थीयतामभ्युत्थीयताम् । आगतोऽयं सदसि सकलनृपतिशिरोमणिर्दानप्रधानसहितः सार्वभौमो द्वापरः ।

( धर्मः सरभसमासनं परित्यज्य स्थितः सम्मुखम् । राजा सादरं पण्डितान्प्रणम्य समाश्लिष्य च तदीयां सफलामाशिषं परिगृह्य सिंहासनमध्यास्ते । अथ च दानधर्मौ राज्ञो दक्षिणहस्तसमीपमध्यासाते । )

[1]**धर्मः**—( राजानं सम्बोध्य पण्डितान्प्रत्येकं दर्शयति । ) भोः ! राजाधिराज ! पश्य—

श्रुतिर्वाक्यं लिङ्गं प्रकरणमथ स्थानकमतः
समाख्या चैतेषां भवति परदौर्बल्यविधिता ।
तथैवं वाक्यार्थं विशदयति चास्मिस( न्स )दसि ते
पुरोऽयं **मीमांसाभ्यसनकुशलः** पण्डितजनः ॥ ३ ॥

पश्यात्र—

अतिव्याप्त्यव्याप्ती अथ भवति चासम्भव इति
त्रिभिः कृत्वा व्याप्त्या सहितमपि तल्लक्षणगणम् ।

१. Ms. adds अथ before धर्मः ।



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

परं भूयो भूयो विशदयति सन्तर्क्य निखिलं
वितण्डाभिः शून्यः सदसि नृप ! **नैयायिकगणः** ॥ ४ ॥

पश्यास्मि[ न् ]--

इमे **वेदान्तज्ञा** जितषडरिवर्गाः सुमतयः
परं द्वन्द्वातीताः सकलविषयान्मोक्तुमनसः ।
सदा शून्यं तत्वैः प्रथितजगदाद्याभिरभितः
स्फुटं लक्ष्यं चित्ते विदधति परब्रह्म नृपते ! ॥ ५ ॥

पश्यात्र---

दृढत्वं सूत्राणां विदधतितरां **व्याकरणिनो**
महाभाष्यस्योक्तेः प्रथममपि सन्दूष्य सकलम् ।
क्वचित्पौर्वापर्यं क्वचिदपि च सूत्रस्थितपदं
क्वचिद्वर्णं तत्र क्वचिदपि च वर्णद्वयमपि ॥ ६ ॥

पश्यात्र---

मीमांसका व्याकरणप्रवीणा नैयायिकाश्चापि च शास्त्रबोधे ।
परस्परं दूषणमादधानाः शास्त्रार्थमुद्दिश्य विरोधयन्ति ॥ ७ ॥

पश्यात्र---

वेदान्तनिष्ठा अपि बुद्धिमन्तो नैयायिकाश्चापि वितर्कवन्तः ।
पदार्थतत्वज्ञतया हि मोक्षे परस्परं दूषणमानयन्ति ॥ ८ ॥

पश्यात्र---

धाय्या समूहितहुताशनमध्यभागे
सान्नाय्य दानकुशलाः शुचि**याज्ञिका**स्ते ।
कालत्रयोक्तसवनोद्यतमेध्यचित्ता
ऊहन्ति मन्त्रमनघाः शुभपाणिनीयात् ॥ ९ ॥

पश्यात्र---

सदभ्यासाधीतामृदुललितकण्ठस्वरयुताः
सम[ स्ता ]र्थाभिज्ञा विहितसकलाचारनिपुणाः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यजूंषि स्वच्छन्दं क्रमपदजटाजुंषि मुदिताः
सुसामान्याथर्वाण्यपि किल पठन्ति द्विजवराः ॥ १० ॥

पश्यात्र—

[1]निर्धार्य सर्वमपि वाङ्मयनिष्ठमर्थं
सम्प्राप्य दैवतकृपां रचितं द्विधैतत् ॥
श्रव्यं च दृश्यमतिहर्षकरं रसाढ्यं
संश्रावयन्ति किल काव्यमितः **कवीन्द्राः** ॥ ११ ॥

अस्मिन्प्रदेशे च—

हारीतसुश्रुतमुखैर्मुनिभिः प्रणीतै-
र्ग्रन्थैः प्रवृद्धमतयो **भिषजां गणास्ते** ।
कालप्रदेशबलसात्म्यमुखैर्विचारै-
र्दोषत्रयस्य समतासु यतन्ति शास्त्रात् ॥ १२ ॥

पश्यात्र—

केचिद्धनुर्ज्यां च विहाय शास्त्रात्कुर्वन्ति लक्ष्यग्रहणं भुजेन ।
केचिद्धनुर्ज्यां भुजकर्मभिश्च **ज्योतिर्विदो**ऽस्मिन्सदसि क्षितीन्द्र ! ॥ १३ ॥

**राजा**—( भूदेवदर्शनजन्मानं हर्षं सशिरोधुन्वनं नाटयति । ) भो धर्म !

एते सर्वेऽपि शास्त्रप्रकरसुनिपुणाः शुद्धिमन्तो द्विजाग्र्या
भव्यैः शास्त्रीयवाक्यैर्मम मुदमतुलां हृत्प्रदेशे सृजन्ति ।
दिष्ट्या दैवेन भद्रं कृतमिह मम यत्सार्वभौमत्वमस्मि-
न्दृष्टिं प्राप्तो मृतोऽयं पुनरपि निखिलो जीवितः शास्त्रसङ्घः ॥ १४ ॥

**धर्मः**—भो राजाधिराज !

---

१. Before this the ms. reads the following two *caraṇas* which might have been a *v.l.* introduced from the margin of the codex used by the scribe.

निर्धार्य सर्वमतिहर्षकरं रसाढ्यं
संश्रावयन्ति किल काव्यमितः कवीन्द्राः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

उज्जीवितानि शास्त्राणि ब्राह्मणाश्चाग्निहोत्रिणः ।
पुष्टिं गतोऽयं यद्दानप्रभावोऽयं प्रभोऽखिलः ॥ १५ ॥

**राजा**—भो भो दान ! मन्निदेशादेते शास्त्ररक्षिणः पण्डिता यावज्जीवं पालनीया दारिद्र्यभयात् ।

**दानम्**—( अञ्जलिं बद्ध्वा ) भो राजाधिराज ! अतितरवितरणशालिनृपकराम्बुरुहात्प्राप्तजन्माहं तथैव निखिलान्भूदेवानपालयं पालयामि पालयिष्ये च ।

**राजा**—भो दान ! मत्समक्षं ब्राह्मणान्दृष्ट्या सम्भाव[ य ] ।

( दानमुत्थाय तथा करोति । अथ दानदृष्टिवृष्ट्या प्राप्तजीवना हृष्टा ब्राह्मणा आशिषा राजानं वर्धयन्ति । यथा

**[ ब्राह्मणाः— ]**

दानोज्जीवितधर्मसुदेहः शास्ता जगतोऽलङ्कृतदेहः ।
नूतनभव्यसमुद्धतरूपो विलसतु राज्ये द्वापरभूपः ॥ १६ ॥

अन्यच्च, तथापीदमस्तु ।

**भाग्योचनामा**श्रितभूरिधामा वसुन्धरा येन कृताभिरामा ।
लावण्यलक्ष्मीललितस्वरूपा जीव्याच्चिरं हर्षनिधानभूपः ॥ १७ ॥

एवं प्रत्येकं सहर्षाः सन्तो बहुविधामाशिषमुदीर्य निष्क्रान्ताः सर्वे । )

मदीयं पाण्डित्यं रसिकजनचित्तं द्रवयितुं
रसास्वादाच्छक्तं भवति मम नास्थास्त्यरसिके ।
तरुण्या रूपस्योत्तरलतरुणः स्तौति शिरसा
तदेतच्चातुर्यं यदि शिशुरतुष्टः किममुना ॥ १८ ॥

**इति श्रीदुर्गेश्वरपण्डितविरचितं धर्मोद्धरणं नाम नाटकं सम्पूर्णम्** ॥ श्रीरामः ॥

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## ERRATA

### भीमविक्रमव्यायोगः ।

| | Read | For |
|---|---|---|
| P. 15. line 5 | °सामग्रीसहितो | °सामग्रीसाहितो |
| P. 15. V. 44 (line 1) | ब्रह्मादयो वा | बह्मादयो वा |
| P. 15. footnote 3 | of verse 48...verse 57 | of verse 47...verse 56 |
| P. 16. lines 22 | किंप्रयोजनाश्च | किं प्रयोजनाश्च |
| P. 18. footnote 6 | for री मि | for री |
| P. 19. line 15 | सज्जीभवतु | सज्ञीभवतु |
| P. 20. line 16 | (कृष्णः स्वत्स्ययनं...करोति) | कृष्णः—स्वस्त्य...रोति |
| P. 21. line 6 (v. 67 l. 1) | परिधि॰ | परिघि॰ |
| P. 22. line 13. (v. 74) | –स्तन्मानाधिक– | –स्तन्मानाघिक– |
| P. 24. line 10 | निखिलक्षत्रि[ य ]कुल– | निखिलक्षत्रिकुल– |
| p 24. footnote 1 | ...to अपराधी ni l. 7 | ...to अपरार्धा |
| P. 26. l. 19 | सकलाभिमत– | सकलभिमत– |
| P. 26. footnote 1 | on folio 12 a and 12 b | on folio 11 a and b |
| P. 27. line 10 | शरौर्ष्टरामैशीतांशौ | शरौर्ष्टरामैशीतांशौ |

### धर्मोद्धरणम् ।

| | Read | For |
|---|---|---|
| P. 31. line 16 | भो अज्ज ! एदे ह्र । | भो अज्ञ ! एदे हि । |
| P. 33. line 11 | °धर्मेश्वरस्य तनुजन्मनो दुर्गेश्वराभिधानस्य कवेः | धर्मेश्वरस्य कवेः |
| P. 35 line 17 | अप्पमणोरहोत्थि । | अप्पमणो रहोत्थि । |
| P. 36. v. 15 (पा. 2) | परोक्षैः | परौक्षैः |
| P. 37. line 3 | (उच्चैः) | (उच्चः) |
| P. 37. line 20 | पश्य | षश्य |
| P. 38. v. 22 (पा. 1) | मध्याह्न° | मध्यह्न |
| P. 40. v. 30 (पा. 4) | राजंस्त्वं | राजस्त्वं |
| P. 41. v. 33 (पा. 2) | –न्सर्वतश्चान्क– | –न्सर्वत्तश्चान्क– |
| P. 42. line 7 | दुर्जयं( र्नयो ) | दुर्जयं ( यो ) |
| P. 44. line 7 | प्रयाताभ्यामावाभ्यां | प्रयाताभ्यमावाभ्यां |
| P. 45. line 1 | -जस्याज्ञानस्य निदेशात् | –जस्याज्ञानस्यनिदेशात् |
| P. 45. line 16 | सकलभूत[ ल ]वर्तिनो | सकलभूतवर्तिनो |

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

| | Read | For |
|---|---|---|
| P. 46. v. 13 ( पा. 4 ) | -र्लभं लाभं | र्लभं लाभं |
| P. 47. line 1 | अथ प्रस्तावना (?) | अथ प्रस्तावना |
| P. 48. v. 5 ( पा. 1 ) | दधि( धी )चि— | दधिचि— |
| P. 48. line 20 | -र्वचनमुक्त्वा | र्वचनमुत्का |
| P. 49. line 16 | ( इत्युक्त्वा ) | ( इत्युत्क्वा ) |
| P. 50. line 21 | ( अथ...नाटयति । ) | अथ...नाटयति । |
| P. 53. line 15 | ( इति गङ्गामुक्त्वा ) | ( इति गङ्गामुत्क्वा |
| P. 57. line 12 | प्रतीहारः ( तथा कृत्वा दर्शयति )= | ( प्रतीहारः......दर्शयति ) |
| P. 58. v. 6 ( सं. छाया) | अथ पुनर्लज्जा — | पुनर्लज्जा — |
| P. 59. line 13 | सहाट्टशब्द— | सहाट्टशद्ब— |
| P. 60. line 3 | ( इत्युक्त्वा | ( इत्युक्त्का |
| P. 60. v. 12 ( पा. 1 ) | धिग्दैवतं | धिद्गैवतं |
| P. 64. line 6 | ( इत्युक्त्वा ) | ( इत्युत्क्वा |
| P. 70. v. 58 ( पा. 3 ) | चतुर्वर्गफलं | चतुवर्गफलं |
| P. 76. line 5 | ( अञ्जलिं बद्धा ) | ( अन्जलिं वद्धा ) |

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust